कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयः

रसमहार्णवः

(म० म० गोकुलनाथोपाध्याय विरचितः)

सम्पादकौ:

(१) पं० श्री धर्मनाथ झा

(२) पं० श्री कुमुदनाथ मिश्र

प्रकाशकः—

कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयः

दरभङ्गा

अथ गोकुलनाथ ग्रन्थावल्यां

तृतीयं पुष्पम्

म० म० गोकुलनाथोपाध्याय-

विरचितो

रसमहार्णवः ॥

गंगौली ग्रामवास्तव्य श्रोत्रिय पण्डित श्रीधर्मनाथझाशर्मणा

तथा लालगंजवासि प० श्रीकुमुदनाथमिश्रशर्मणा च

संशोध्य सम्पादितः ॥

प्रकाशकः—

कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयः दरभङ्गा

श्रीगङ्गा दशहरा (१९८१)

मूल्य—६)

आमुखम्

ग्रन्थोऽयं यथार्थतः लक्षणामात्र माश्रयन्त्या कल्पनया सम्भृतः पृथग्विधैरलङ्कारै रलङ्कृतोरसोचितरीतिनिचितः प्रसादादि-गुणगणेन रमणीयः। क्वचिच्च शब्दशक्त्यार्थविशेषं प्रत्याययन् निवेदयति कवेर्लोकोत्तरवर्णने प्रवीणताम्।

स्वल्पकायोऽपि विचारचातुरीपरिपूर्णतयार्थतोगुरु रयं ग्रन्थोऽवलोकनात्सर्वां स्त्रमेव विपश्चितांश्च तांसि चमत्करिष्यतीत्याशासे—

विदुषाम्वशम्वदः
कुलपतिः–डा० जयमन्तमिश्रः
का०सिं०द०सं०वि०विद्यालयस्थः।

प्रस्तावना

मिथिलामहीमहीसुराभिजन नलिन प्रद्योतनेनाष्टादशविद्यास्थानकोविदेन माध्यन्दिनमूर्धन्येनातिगहनसंशयग्रन्थिच्छिदुरेण वैदेहस्य ब्रह्मबिदो विद्यानिधेः पीताम्बरस्य सुचरितार्णवपूर्णचन्द्रेण भवसिन्धुपोते परमार्थसति भगवति भावानीपतावेव प्रीतिमता सकलसिद्धान्तगुरुणा महामहोपाध्यायेन गोकुलनाथोपाध्यायेन निर्मितासु परश्शतासु कृतिष्वन्यतमा चमत्क्रियातिरेकेण धन्यतमा रसार्णबाभिधेयेयं कृतिः कस्य कृतिनो न चेतश्चमत्करोतितमाम्।

विदितमेव तत्रभवतां सहृदयानां संस्कृतवाङ्मये साहित्यशास्त्रस्य महनीयं महत्त्वम्। सहितस्य भावः–साहित्यम्। सहभावश्चाष्टादशप्रस्थानभिन्नानां विद्यानाम्। अथवा सहितस्य कर्म साहित्यम्। यस्मादत्र परीदयमाणे कविकर्मणि काव्ये सर्वा बिद्याः परिसमाप्यन्ते। सर्वासां विद्यानामलौकिकार्थप्रतिभासन समर्थकाव्याङ्गत्वम्। "नतत्पदं न तद्वाक्यं न साविद्या न साकला, जायतेयन्न काव्याङ्ग महोभारो महान् कवेः" इति साहित्यमीमांसायाम्। "विद्याः समस्तायत्राङ्ग महोभारो महान् कवे" रित्यग्निपुराणे च स्मरणात्सिद्धम्।

अलङ्कारापरपर्याय साहित्यदर्शनेऽस्मिन्नलौकिकार्थप्रतिभासस्यैव चमत्काराधायकत्वनिरूपणात्। सप्रयोजनलक्षणायां, सर्वत्रनिरूढलक्षणाञ्च क्वचिद्व्यङ्ग्यार्थप्रतीतेरावश्यकतया लक्ष्यार्थप्रतीतेश्चमत्काराधायकत्वे समेषामप्यालङ्कारिणामैकमत्यम्।

वृत्त्यात्मक सम्बन्धज्ञानम्बिना शब्दादर्थप्रतीतेरननुभवादावश्यकतयावृत्तिरूपसम्बन्धज्ञानमप्यावश्यकं शब्दादर्थप्रतिपत्तिमभिवाञ्छताम्। शक्तिलक्षणाव्यञ्जनान्यतमवृत्तिमहसहकारेण शब्दात्प्रतिपत्तिगोचरतांप्रपद्यमानोऽर्थ स्त्रिविधः।

शक्योलक्ष्यो व्यङ्ग्यश्चेति। व्यञ्जनानभ्युपगन्तृ न्यायवैशेषिककौमारिलमतानुयायिभिरपि तात्पर्याख्यावृत्तिसमर्पितार्थाभ्युपगमेन नार्थस्यत्रिविधत्वहानिः। तात्पर्यन्तु "घटेने" त्यादिवाक्ये 'घटेने' त्याद्यानुपूर्व्यवच्छिन्ने घटीयाकरणतेत्याद्यन्वयानुभवाभावप्रयोजकीभूताभावप्रतियोगित्वस्वरूपम्। तच्च वाक्यधर्मतया वाक्यवृत्तिरितिपरिभाष्यते। वाक्यार्थे लक्षणावादिनां भट्टानां मते प्रतिपाद्यसम्बन्धो वाक्यस्य तात्पर्यमेव लक्षणेति व्यपदिश्यते। व्यञ्जनामनभ्युपगच्छतां मते "गङ्गायां घोष" इत्यत्र लक्ष्यार्थे तटे पावनत्वादेर्बोधे 'तटोगङ्गे' त्यभेदबोधोवैयञ्जनिको नापेद्यते, किन्तु अवाचकशब्दप्रयोगत्वावच्छेदेन लक्ष्ये वाच्यधर्मग्राहकत्वव्युत्पत्त्या गङ्गापदजन्यतटबुद्धिस्तद्बोधेकारणम्। गङ्गापदस्य तटे गङ्गाधर्माभिप्रायकत्वेगृहीते स्मृतानां पावनत्वादीनां शब्देन मनसा वा तटे वैशिष्ट्यावगमजननात्।

लक्षणावृत्तिनिरूपणात्मकेऽस्मिन्निबन्धे चमत्कारिव्यङ्ग्यार्थ समुल्लासाधिक्येनास्यनिबन्धस्य "रसमहार्णव" इत्यभिधानमन्वर्थतामञ्चति। यत्स्वयमेव ग्रन्थकृता "रसिकैः काव्यमीमांसा प्रस्थाने यद्विविच्यते, निर्मितस्तत्प्रपञ्चायमया रसमहार्णव" इत्युक्तम्।

निबन्धेऽस्मिन् लक्षणास्वरूपप्रकारकारणप्रयोजनानां सूक्ष्मातिसूक्ष्मतत्त्वनिरूपणमन्यत्रादृष्टपूर्वं प्रौढ पण्डितकुलास्वाद्यरसं विजयते।

मुख्यार्थबोधविरोधित्वेन निराकाङ्क्षत्वस्य लक्षणाबीजत्वप्रदर्शनावसरे "कृतसीतापरित्यागः सरत्नाकरमेखलाम्। बुभुजे पृथिवीपालः पृथिवीमेव केवलाम्" इत्यत्र 'बुभोजे' त्यपहाय 'बुभुज' इत्युपादानस्याभिधामूलव्यञ्जनया पृथिवीमेव बुभुजे नत्वन्यां स्त्रियमिति परिसंख्यालङ्कारव्यञ्जनप्रयोजकतयानिरूपणं तत्रत्यशाब्दबोधनिरूपणप्रकारश्च सुकुमारमतीनामपि सूक्ष्मातिसूक्ष्मतत्त्वबोध मनायासेनैवादिधाते।

निरूढलक्षणायां प्रयोजन व्यञ्जनप्रदर्शनावसरे कौण्डपायिनामयननाम्नि

क्रतौ प्रक्रान्तेऽग्निहोत्रं जुहोती "ति श्रूयमाणस्याग्निहोत्रस्य नित्यहोमे रूढस्य 'अग्नये होत्र' मितियोगार्थे निरूढलक्षणयानित्याग्निहोत्रधर्माणां प्रकृतयागेऽतिदेश एव प्रयोजनम्। अतिदेशश्च लक्ष्यार्थे लक्षकसमारितामितिकर्तव्यतानां व्यञ्जनया वैशिष्ट्यावगमएव।

यदि तु इतिकर्तव्यताबोधकपदानामध्याहारेण तदेकवाक्यतापन्न प्रधान विधिनान्वयबोधान्तरजननमेवातिदेशपदार्थः स्यात् तदातिदेशप्राप्तभिघातादीनां कृष्णले वैतुष्यव्यापारबाधादुबाधोनस्यात्, श्रुतिप्राप्ते दृष्टोपकारालाभेऽप्यदृष्टोपकारकल्पनाया एवोचितत्वात्। इत्यभिधानेन ग्रन्थकृतो मीमांसाशास्त्रे सर्वातिशायिपाण्डित्यप्रकर्षो व्यज्यते।

वस्तुतो ग्रन्थकृतो वस्तुनिरूपणरीतिरेवेदृशी ययानिरूपितानां वस्तूनामनानायासेनैवा प्रामाण्यज्ञानानास्कन्दितोनिश्चयो जायते। सर्वासुविद्यासु प्रकृत प्रबन्धकृन्निर्मितनिबन्धानां प्रगल्भविवेचनोदञ्चितत्वं तदध्ययन भावनाभ्यामेवानुभवितुं शक्यते।

ग्रन्थकृत इति वृत्तकृतीनाम्परिचयो वाराणसेयसम्पूर्णानन्द संस्कृतविश्वविद्यालयतः प्रकाशिताना मेतन्निर्मितपदवाक्यरत्नाकर काव्यप्रकाशविवरणादीनामुपोद्घातेभ्यो जिज्ञासुभिः सुलभ इति नेहवाऽवपन्यस्ताः।

विविधविद्यालङ्कृतमतिभ्यः श्रितविद्याभृद्धपदन्यासक्षुण्णक्षितिभ्यः का० सिं०द० संस्कृतविश्वविद्यालयस्य कुलपतिभ्यो डा० श्रीजयमन्तमिश्र महोदयेभ्यः साधुवाद सरोरुहाणि समर्प्यन्ते येषां सत्प्रयत्नेनायं निबन्धः प्रकाशनकर्मतामलभत्।

उक्त विश्वविद्यालयस्य कुलसचिवपदं प्रपद्यमानानां विद्यानुरागसम्भृतस्वान्तानां विदुषां डा० श्रीसच्चिदानन्द चातुर्धुरीणानां महोदयानां प्राचीनग्रन्थोद्धाराध्यवसायोऽपि पुस्तक प्रकाशने भृशमुपाकरोदतस्तेऽपि धन्यवादार्हाः।

एतन्निबन्धस्य प्रकाशने सम्पादनेन साहायक माचरन्तौ न्यायाचार्यौ सुधियौ झोपाख्य धर्मनाथमिश्रोपाख्य कुमुदनाथशर्माणौ धन्यवादार्हौं।

अन्ते च स्वारसिक कारुण्यस्निग्धस्वान्तान् प्राज्ञान् प्रकाशनाशेषदोषाणां क्षमामभ्यर्थ्य विरम्यतेविस्तरात्।

विदुषा-माश्रवः

श्री रामसेवकझा,

अनन्त चतुर्दशी स्नातकोत्तर दर्शन विभागाध्यक्षः।

वि० सं० २०३८ कामेश्वरसिंह दरभंगा संस्कृत विश्वविद्यालयः दरभंगा

ओँ नमस्तस्यै

मुख्यार्थो लक्षकस्तस्य श्रुतार्थप्रत्ययोग्यता ।
लक्ष्ये रूढिर्व्यञ्जनम्वा सहकारीति तान्त्रिकाः ॥

कलिङ्गोरिङ्गतीत्यत्र कलिङ्गपदेन मुख्यया वृत्त्या स्मारितो जनपदविशेषस्तस्य तथाविधा स्मृतिर्वा कारणम् । तज्जनिता तज्जनपदनिवासिपुरुषस्मृतिर्व्यापारः पुरुषविशेषो रिङ्गतीत्यन्वय बोधःफलम् । "द्विरेफो मधुरं रौति, द्विकः कूजति कानन" इत्यत्र द्विरेफशब्दो बहुब्रीहि रूढ्या भ्रमर शब्दत्वेन, द्विकशब्दश्च काक-शब्दत्वेन वर्णसन्दर्भ स्मारयति । अथवा बहुब्रीह्यारम्भको रेफादि-शब्दः प्रथमं वर्णविशेषमभिधाय स्मारितरेफद्वयारब्धपदत्वेन क्रकर, कर्करा, बर्वर, दुर्दुरादि शब्दसाधारण्येन भ्रमरशब्दम्, ककारश्च स्व-रूप परिभाषितो बहुब्रीहिघटकः कंक केका किंकर क्रकरादि साधारण ककार द्वयारब्धशब्दत्वेन काकपदं स्मारयति । सैव भ्रमर काक पद स्मृति रभिधया बोध्यबोधकभावेनवा संस्पृष्टमलि बलिभुजञ्च स्मारयित्वानुभावयति । अपेक्ष्यते च कलिङ्ग द्विरेफादिभिः शब्दैः प्रयुक्तया पुरुष विशेष मधुव्रतादीनामुपस्थित्या तदनुभवजनने सह-कारिरूढिज्ञानम् ।

रूढिस्तु वस्तुविशेषे शब्दविशेषस्यानादिप्रयोगः । कलिङ्गादिपदजन्यपुरुषविशेषानुभवत्वावच्छिन्ने सर्वत्र तथाविधा-नुभवत्वंसवैशिष्ट्यं तथाविधानुभवप्रागभावत्वावच्छेदेन तथो

विधानुभव समानकालिकत्वम्वा । 'गङ्गायां घोष' इत्यादौ गङ्गा पदेनाभिधया प्रवाहस्वरूपमहावयवि वृत्त्या जात्या जाह्नवी स्मार्यते, नतु धर्मविशेषजनकतावच्छेदकतया सिद्धया तदवयवावयविसाधारण्या। उद्धृत जाह्नवीजले गङ्गापदप्रयोगाभावात्। "गङ्गा हरति वै पापं दृष्टा पीतावगाहिता, पीताकार्पटिकैं गङ्गे" त्यादौ त्ववयवावयवि भावसंसर्गमूलिका शुद्धा साध्यवसानिकैव लक्षणा। गङ्गायाः प्रवाह इव पीयमानस्तदेकदेशोऽपि पावन इति पीतभूयिष्ठानि जाह्नवी जलानि इति च व्यञ्जन प्रयोजनम्। तथाच पूरस्मृत्या तटं स्मरति। गङ्गापदजनितपूरस्मरणजनिता तटस्मृतिस्तदनुभवजनने, गङ्गापदजन्मा तटानुभवस्तटे गङ्गाधर्म व्यञ्जक, इत्यादि प्रयोजनवत्ता प्रतिसन्धानमपेक्षते। यत्र लक्षणयोपस्थितेऽपि पदार्थे रूढिः, प्रयोजनम्वा न प्रतिसन्धीयते, तत्र न जायत एव लक्ष्यानुभवः। यदाहुः।

"निरूढा लक्षणाः काश्चित्प्रसिद्धा अभिधानवत्। क्रियन्ते साम्प्रतं लोके काश्चिन्नैवत्वशक्तित "इति, 'रूपमत्रस्ति'त्यादौ रूपादिशब्दस्य गुणिनि लक्षणा नस्वीक्रियते नानुभवोपहिता भवति, रूढिप्रयोजनात्मकसहकारिशक्तेरभावादितिचरमपदार्थः।

नन्वभिधयेव लक्षणयोपस्थितस्याप्यन्वयबोधानुप्रवेश स्वीकारे 'गङ्गायां गोकुल' मित्यादाविव 'गङ्गायांगुण' इत्यादावपि तटमनुभूयेतेति चेन्न। मुख्येनार्थेनामुख्यार्थस्मरणे मुख्यार्थस्य श्रुतार्थं प्रत्ययोग्यताबुद्धेरपि सहकारिताभ्युपगमात्। तथाहि 'गङ्गायां गोकुल, मित्यत्र गङ्गा सप्तमी गोकुलप्रथमानां प्रथमम्, अथ स्वधुनिधारा अधिकरणता व्रजवचनानां स्मरण माकाङ्क्षाविषयकम्, तदाहत्य न शाब्दबुद्धिं जनयति, गोकुलाधिकरणत्वाभावावच्छे

दकेन गङ्गात्वेन गृहीतेगोकुलाधिकरणत्वान्वयासम्भवादूगङ्गात्वा-वच्छेदेन गोकुलाधिकरणत्वाभावावगाहिनः संस्कारस्यापि गङ्गागोकुलाधिकरणमितिबुद्धौ विरोधित्वात्। यत्र च पदसमूहस्य, पदार्थसमूहस्य वा स्मरणमेव गङ्गात्वावच्छेदेन गोकुलानधिकरणत्व-मवगाहते, तत्रापि न श्रुतिपदार्थान्वयबोधः, किन्तु तदमुपादाय तावतां स्मरणान्तरमुत्पद्यते। स्मरणोत्पत्तिविरोधिबलवच्छाब्द सामग्र्या मुख्यार्थगोचर बोधेन प्रतिबन्धात्। 'गङ्गायां गुण' इत्यत्र बलवन्मुख्यार्थान्वय बुद्धिसामग्रीसत्त्वादमुख्योऽर्थो न स्मर्यत इति न लक्ष्यार्थस्मरण एव श्रुतार्था नुपपत्तेरुपयोगः। तदाहुः

"वाक्यार्थस्य च वाक्यार्थे सम्बन्धानुपपत्तितः। तत्सम्बन्धबला-त्प्राप्तस्यान्वयाल्लक्षणोच्यते" इति वाक्यार्थे सम्बन्धानुपपत्तिमानान्तर गृहीततात्पर्यके पदार्थे यथाश्रुतलक्षकपदार्थान्वयानुपपत्तिः। 'कुत्र गोकुलमिति गोस्वामि प्रश्नानन्तरं यत्र "गङ्गायां गोकुल" मिति गवाधिकृतस्योत्तरम्' तत्र गोकुलाधिकरणत्वावान्तरधर्म प्रकारकजिज्ञासा निवर्तकतया गृहीतस्योत्तरवाक्यस्य गोकुलादिपदे मुख्यार्थे तात्पर्यमवधारितमिति तदन्वयानुपपत्तेरनिर्धारित तात्पर्य कस्य पदस्य मुख्येनार्थेनामुख्योऽर्थः स्मर्यत इति तदर्थः। अतएव वाक्यार्थपदं निश्चितपदार्थान्तरपरमितिकण्टकोद्धारकृतः। सम्बन्धा नुपपत्ति रितिहेतुः तत्सम्बन्धवश प्राप्तो अन्वेति। तथा च स्वभावबच्छाब्दबोधसामग्रीविघटकतया मुख्यार्थबाधस्य लक्ष्यार्थस्मृता वुपयोग इति मुख्यार्थ बाधो लक्षणाबीजमित्युच्यते। क्वचित्तु–निराकाङ्क्षत्वं लक्षणाबीजम्, तच्च क्वचिद्विषये स्ववाच्यस्य वाक्यार्थबुद्धिं प्रत्यस्वरूपयोग्यत्वात्। यथा "वदनं-वदनं तस्या

मुखममुखं भातिचान्यासो" मित्यत्र वदनत्वेनमुखतादात्म्य मुखान्यो-
न्याभावादिधर्मितावच्छेदकतया शाब्दबुद्धिप्रकारतया कारणीभूतायाः
पदार्थोपस्थितेर्धर्मितावच्छेदकतया च जनकाद्योग्यताज्ञानादापद्य-
माना विषययोग्यतयैवनिराक्रियते ! तथाहि ।

तादात्म्यसंसर्गावच्छिन्न मुख तद्भिन्नादि प्रकारतानिरुपिता
नवच्छिन्नधर्मितावच्छेदकतासम्बन्धेनशाब्दबुद्धौ मुखत्वभिन्नवृत्ति-
विषयतासंसर्गेण जन्यबुद्धिसामान्ये वा मुखत्वान्योन्याभावः
कारणम् । पृथिवीमुखं लोचनं न मुखमित्यादौ पृथिवीत्व लोचन-
त्वादौ विद्यमानापि धर्मितावच्छेदकतया योग्यता बुद्धिः प्रकारतया
पदार्थ स्मृतिश्च मुखत्वान्योन्याभावघटितयैव सामग्र्या धर्मिताव-
च्छेदकतया मुख तदन्योन्याभावादि शाब्दबुद्धिं प्रयोजयति, न च
मुखत्वे तथाविधा सामग्रीति । विघटितायां मुख्यार्थबुद्धौ मुखादि
शब्दे राहुदादिकं लक्ष्यते ।

यत्तु 'वदनं-वदनं' मित्यत्र पदान्तरव्यतिरेकप्रयुक्ता
न्वयाननुभावकत्व लक्षणाकाङ्क्षाविरह एव लक्षणाबीजम्, वदन
पदनिष्ठस्य वदने वदनतादात्म्याननुभावकत्वस्य शिलाशकलव
त्स्वरूपायत्तत्वात् । द्वितीय वदनपदव्यतिरेकप्रयुक्तत्वाभावादिति ।

तन्न ! "वदनं वदन' मिति समभिव्याहारस्य वदन पदार्थ-
तावच्छेदकावच्छिन्नप्रकारतानिरूपिताभेदसंसर्गतानिरूपित वदन
पदार्थतावच्छेदकावच्छिन्न विशेष्यताक वाक्यार्थ बुद्ध्यभावप्रयोजकी
भूताभाव प्रतियोगित्वमेवाकाङ्क्षा । साचात्राप्यविकलैव !

अन्यथा, लक्ष्यार्थं मादायापि सामानाधिकरण्यानुपपत्तेः। नहि पदार्थभेदेन पदानामाकाङ्क्षा भिद्यते, स्फोटवादानुप्रवेशापत्तेः। क्वचिदनुशासनसिद्ध मर्थविशेषे निराकाङ्क्षत्वम्।

यथा "कृतसीतापरित्यागः सरत्नाकरमेखलाम्, बुभुजे पृथिवीपालः पृथिवीमेव केवला" मित्यत्र 'भुज्' धातोरवनवाचकस्यात्मनेपदनिराकाङ्क्षतया वाक्यार्थपालनबुद्धौ प्रतिबद्धायां पालनेन शासनं लक्ष्यते। आत्मने पदसमभिव्याहृतभुजित्वावच्छेदेनाख्यातोपात्तकर्तृत्वान्वितपालनबुद्धिस्वरूपायोग्यत्वस्वरूपं निराकाङ्क्षत्व मेवहि "भुजोऽवने" इतिसूत्रेणानुशिष्यते। यदितु भुजे रनवने नित्यमात्मनेपदम्, अवनेतु—विभाषेति सूत्रार्थः तेन 'बुभुजे' प्रतिपालनार्थकमेव। बुभोजे त्यपहाय 'बुभुज' इत्युपादानन्तु व्यङ्ग्यत्वचमत्कारलाभाय।

तथाहि, 'केवलां' पदेन तात्कालिक पृथिवीपालकर्तृकभोगकर्मनिष्ठान्योऽन्याभावप्रतियोगितानवच्छेदकैकान्वययोगिनी व्यक्तिरभिधीयते। तथाविध केवलातादात्म्यविशेषितपृथिव्यास्तात्कालिक पृथिवीपालकर्तृकभोगे कर्मतयान्वयः। तथाविधपृथिव्यन्यत्र द्वितीयाया एवकारलभ्येतु, एवकारस्यैव, वा लक्षणयालभ्यस्य तात्कालिक पृथिवीपालकर्तृकभोगकर्मत्वस्य पृथिवीपालाभिन्नकर्तृविशेषिततात्कालिकभोगेवा केवलपृथिव्यन्यकर्मकत्वस्य व्यवच्छेदो यथादर्शनव्युत्पत्तिर्भासते। 'केवला' पदेनार्थतोलभ्यमानोऽप्येवकारः स्फुटतरः, व्यङ्ग्यार्थप्रतिभासप्रयोजनकत्वा दप्यपुष्टार्थकत्वं न भजते। व्यज्यतेह्यत्रपृथिवींबुभुजे, न त्वन्यां स्त्रिय मिति परिसंख्यालङ्कारः। तेन

च नायकस्य नायिकापरित्यागेऽप्यनुकूलत्वातिशयः। तत्र च पृथिव्यन्यत्र स्त्रियां मिथुनीभावलक्षणएवभोगः परिसंख्यातव्यः। सच परस्मैषदिना भुजिना नाभिधातुं शक्यते, इत्यभिधामूल व्यञ्जनयापि न प्रतीयेतेति तत्कर्मत्वमपि न व्यवच्छिद्येत।

व्यञ्जनावृत्त्यनङ्गीकारेऽभिधयैव भुज्युपात्तस्य मैथुन रूपार्थस्य कर्मत्व मेवकारादिलक्षणयानूद्य परिसंख्यातव्यम्।

नच तद्बोधकसमभिव्याहाराभावे तद्घटितयोग एवकारेण लक्षयितुं, व्यवच्छेदो वा तस्य बोधयितुं शक्यते, इत्यात्मने पदी भुज्धातु रुपात्तः।

अन्यथा, "पद्मस्यैवप्रियोमित्रः कलिकालेसमागत" इत्यत्रापि पद्मेतरस्य मित्रं न प्रिय मित्यर्थो ऽभिधया, व्यञ्जनया वा वगम्येत। तस्माद्– "बुभोज पृथिवीपाल" इत्यभिहिते स्त्रियां निधूवनकर्मत्व व्यवच्छेदलाभो नस्यादिति बुभुज इत्युपात्तमिति विभाव्यते। तथासत्यपि रथोगच्छतीत्यत्राख्यातस्याश्रयत्वलक्षकत्वे आख्यात मुख्यार्थ प्रयत्नबाधइव धातोः प्रथमान्तनिराकाङ्क्षत्वमपि बीजमवसेयम्। क्वचिच्च मानान्तर लभ्येऽर्थे सिद्धेः प्रतिबन्धिकायाः सत्बादनाकाङ्क्षत्वं लक्षणाबीजम्। यथा।

"रामोऽस्मि सर्वं सह" इत्यत्र रामोऽस्मीति वाक्यमनुपपद्यमानत्वा दर्थान्तर संक्रमितवाचक मिति रामपदं राज्यभ्रंश, पितृमरण, बनवास, दारव्यसनादि दुःखानुभवितरि लाक्षणिक मत एव रामोऽस्मीति वाक्यार्थः सर्वसहनत्व हेतुरिति समभिव्याहार विशेषात्।

सा चेयं लक्षणा द्विविधापि प्रत्येकं द्विविधो उपादान-लक्षणा लक्षणलक्षणा चेति, तत्र "मुख्यार्थापरिहारेण लक्ष्यार्थमपि बोधयन् शब्दशक्यार्थसम्बन्धः स्यादुपादान लक्षणा ।" मुख्यार्थविषयकस्यापदार्थस्मरणस्य शाब्दबोधस्य वा, जनिका-लक्षणा उपादानलक्षणा स्मरणगतमुख्यार्थलक्ष्य विषयताप्रयोजिकेति यावत् । 'तेन काकेभ्योदधिरक्ष्यता' मित्यत्र काकपदस्य मुख्यार्थ वृत्ति दध्युपघातकत्वएव लक्षणा, साच काकवृत्तितिर्यक्त्वेन दध्युपघातकत्वेन वा श्वानमिव काकमपिस्मारयितुमीष्टे ।

'नीलोघटः' 'कुन्ताः प्रविशन्ति' इत्यादौ नील गुणावच्छेदेन कुन्तावच्छेदेन च गृह्यमाणो नील कुन्तयोः सम्बन्धः प्रकारतया नील कुन्तौ स्मारयितुमर्हतीति तदुपग्रहः । गौणी तु न सम्भवत्येवोपादान-लक्षणा, गोवाहीकोभयाभिप्रायेण प्रयुक्ते "गावश्चानीयन्ता" मिति वाक्ये गोपदेन शक्त्या गावः, वाहीकस्तु गौण्योपस्थाप्यन्ते । गंगायां 'घोष मत्स्यौ' इत्तादाविव युगपद्वृत्त्योः प्रसरः स्मरणगतगोविषयत्वन्तु न सादृश्यप्रयोज्यकम्, गवावृत्तित्वात् नापि गौ लक्षणाप्रवृत्तिनिमित्तम्, जड़त्वेनैव तस्य लक्ष्यत्वात् । जड़त्वेन वाहीके गृहीतायां लक्षणायां तेन प्रकारेण वाहीकस्मरणाद्गौरपिवाक्यार्थबुद्धौ विषयतामापद्यते, वृत्त्या पदार्थ स्मरणस्य तदनुभवस्य च समानप्रकारकत्वेनैव कार्यकारणभावादितिमतेऽपि न गौणवृत्ते रूपादानत्वं सम्भवति गोस्मरणानुपयोगित्वात् ।

यदितु गोवृत्तिधर्मवत्त्वादिना गोवाहीकोभयस्य स्मरणे गोसादृश्यं लक्षणयोपयुज्यते तदा गौण्यपि सम्भवत्युपादानलक्षणेतिध्येयम् ।

यदि तु 'लम्बकर्णमानये'त्यादा वुपादानलक्षणा 'चित्रगुमानये' त्यादौ न तथेतिविवेकः प्रामाणिक, स्तदा लक्ष्याहितपदार्थान्तराहितमुख्यार्थबोधिका लक्षणोपादानलक्षणेतिलक्षणीयम् । भवतिहि 'लम्बकर्णमानये' त्यादौ कर्णादे रानयनान्वयः, नतु चित्रगुमानयेत्यादौ गवानयनान्वयः । 'श्वेतं पश्येत्याद' वुपादानं 'श्वेतो धावता' त्यादौ तन्मते लक्षणैवेतिध्येयम् ।

यत्तु 'काकेभ्यो दधि गोपाये' त्यादावपि 'गावएते समानीयन्ता' मित्यादाविव भक्तिशक्तिभ्यामेव श्वकाकयोरन्वयः । नीलोघट इत्यादौ समवायिनि लक्षण लक्षणा तदेकदेशे समवाये शक्यस्य गुणस्यान्वयः, 'कुन्ताः प्रविशन्ति' इत्यत्र संयोगिनि लक्षणा, संयोगे कुन्तस्यान्वयः । 'लम्बकर्ण' इत्यादौ कर्णपदस्य लम्बकर्णपदयोर्वा सम्बन्धिनि लक्षणा, तत्र लम्बाभिन्नकर्णस्यान्वयः । 'राजपुरुष' इत्यादौ राजपदस्य संबन्धिनि लक्षणा, तत्रमुख्यार्थस्यान्वयः । 'त्वामस्मिवच्मी' त्यत्र वचे हिंतबुद्धौ लक्षणा, तस्याः जनकतया मुख्यार्थे वचनेऽन्वयः, 'छत्रिणोयान्ती' त्यत्र छत्रपदस्यसार्थत्वे लक्षणा, तत्र छत्रंसामानाधिकरण्येनान्वेति, छत्रसमानाधिकरण सार्थत्वाधिकरणमिणिना प्रत्याय्यते । इति नास्त्येवोपादानलक्षणाया विविक्तो विषय इतिमतम् ।

तच्च धात्वर्थनामार्थयोः प्रातिपदिकार्थयोश्च भेदेनान्वयबुद्धिविरोधाभावे नीलादि पदा न्नीलसमवायित्वादिना गुणं भासते, नतु नीलगुणेन प्रकारेणे त्यभ्युपगमे च सम्भवति नान्यथेतिदिक् ।

या शब्दवृत्तिर्मुख्यार्थग्रहणं प्रत्यसाम्प्रतं द्विधा। शुद्धा च, गौणीचेत्यसौ लक्षणलक्षणा। यद्धर्मावच्छिन्ने यत्पदस्य लक्षणा मुख्यार्थस्मरणंप्रत्यसमर्था तद्धर्मिणि तत्पदेलक्षणा लक्षणलक्षणे त्युच्यते। स एवहि गङ्गापदार्थसम्बन्धः शुद्धतटत्वावच्छेदेन लक्षणलक्षणेत्युच्यते। गङ्गातटत्वावच्छेदेन उपादानलक्षणा, नहिगङ्गापदं तटत्वेनैवस्मारयतीतिनियमः। नापि निरूढायामिव प्रयोजनवत्यामपिलक्षणायां प्रतिनियतं प्रवृत्तिनिमित्तमिस्यभ्युपेतुं शक्यते, तटत्वावच्छेदेन भूतलत्वावच्छेदेन वा वृत्तिग्रहे तद्धर्मप्रकाराणां स्मरणानां शाब्दबोधाङ्गत्वादित्यालोककृतः।

तत्र निरूढोपादानलक्षणा। श्वेतो धावतीत्यत्र श्वेतपदस्य गुणिनि, राजपुरुष इत्यत्र राजपदस्य राजसम्बन्धिनि, लम्बकर्णमानयेत्यादौ लम्बकर्णपदयोः लम्बाभिन्नकर्णसम्बन्धिनि, 'तैलानि हमन्ते सुखानी'–त्यत्र तैलपदस्य तिलस्नेहे, रूढस्य सस्यप्रभवस्नेहसामान्ये, तिलपदस्य वा स्नेहवति सस्ये, 'मुखेन्दु'–रसौ तवे 'त्यत्र इन्दुपदस्य चन्द्रसदृशेचोदाहरणीया। प्रयोजनवतितु कुन्ताः प्रविशन्ति, त्वामस्मिवच्मीत्यादौ, गौणीतूपादानलक्षणा सम्भवत्येवेति शुद्धानिरूढोपादानलक्षणा, शुद्धा प्रयोजनवत्युपादानलक्षणेति द्विधैव, लक्षणातु शुद्धा रूढौ लक्षणलक्षणा, शुद्धा प्रयोजने लक्षणलक्षणा, गौणी लक्षणलक्षणा, गौणी रूढौ लक्षणलक्षणा, गौणी प्रयोजने लक्षणलक्षणा चेति चतुर्धा। तत्राद्या 'पौण्डरीकं चक्षुः' 'कोमलात्वगि'–त्यादौ त्वगादिपदस्येन्द्रियवाचिनः तत्परिहारेण चर्मणि गोलके च। द्वितीयातु गङ्गायां गोकुलमित्यादौ गङ्गादिपदस्य प्रवाहवाचिनः तत्परिहारेण शुद्धतटे। तृतीया पुनरूपसङ्क्रमरित्वा 'मांसमग्निहोत्रं

जुहोती'-त्यत्राग्निहोत्रपदस्य कौण्डपायिनामयने वैदिकप्रयोगस्थानादितया निरूढत्वात्। 'मुखेन्दुराह्लादयती'-त्यत्र इन्दुपदस्य प्रसादादिगुणवति मयूरव्यंसकादयश्चेत्यनुशासनसिद्धाया (लक्षण) लक्षणाया निरूढेरावश्यकत्वात्। गौणत्वानभ्युपगमेतु शक्यधर्मग्राहकतयातिदेशकत्वानुपपत्तेः। नहि शुद्धानिरूढालक्षणा क्वचिदभिदेशिका दृष्टा। न चातिदेशादन्यदवाचकवैदिकपदप्रयोजनम्।

यदाह महिमभट्टः– 'अतिदेशप्रकारोऽयमर्थान्तरे शब्दाभिनिवेशोनामेति।' तुरीयातु 'गौर्वाहीक' इत्यत्र वाहीकपदस्य जाड्यादिगुणवति, 'मुखमिन्दु' रित्यत्रेन्दुपदस्य प्रसादादिगुणवति चेत्येवमुदाहरणीया। अत्र प्रकाशकृतः—

गौणीलक्षणा द्विविधा सारोपा, साध्यवसानिका चेति।

लक्षकपदप्रवृत्तिनिमित्तविरोधिधर्मावच्छिन्नबोधकपदसमानाधिकरणपदस्यलक्षणा सारोपा, यथा–'गौर्वाहीक' इति। तथाविधपदासमानाधिकरणपदलक्षणा साध्यवसाना, यथा 'गाम्पुरो नयेति।' एवं सादृश्यहेतुका गौणीलक्षणा द्विविधा। सादृश्यान्यकार्यकारणभावादिसम्बन्धलक्षणा. सारोपा, साध्यवसाना चेति। यथा 'आनन्दंचन्द्रं पश्य,' 'नेत्रानन्दं पश्य' चेतिसादृश्य कार्यकारणभावादिसम्बन्धभिन्नसामीप्यादिसम्बन्धहेतुकालक्षणा नियमतः साध्यवसानिकैव, नहि 'कुन्ताः पुरुषाः प्रविशन्ति' 'गङ्गायां तटे घोष' इति प्रयुञ्जते।

यदितु 'मत्ताः कुन्ताः प्रविशन्ति' 'प्ररूढ शाङ्कुरायां गङ्गायांघोष' इत्यादौ धारणसंयोगादिहेतुकापिलक्षणा विरुद्धार्थकपद-

समानाधिकरणपदस्य दृश्यते, कुन्ताः पुरुषाः 'गङ्गायां तटे' इति प्रयोगस्तु पुरुषतटत्वविशिष्टकुन्तगङ्गापदाभ्यामुपात्तत्वात्पुनरुक्तिवशादेवनिरस्तः उक्तार्थानामप्रयोग इतिन्यायात्, अतः संयोगादिकार्यकारणभावादिहेतुकलक्षणायाः पृथक्परित्यागमनुचितम्, संसर्गभेदेन लक्षणाभेदेन गणनानन्त्यप्रसङ्गादित्युच्यते तदेवमालोचनीयम् ।

जातिमल्लक्षकपदस्य या लक्षणा सैवोपादानलक्षणमिति। काकेभ्यो दधिरक्ष्यतामित्यत्र काकपदेन तिर्यक्त्वेन दध्युपघातकाः श्वकाकादयो लक्ष्यन्ते । भ्रममूलकस्य वृत्तिव्यभिचारित्वादसाधुत्वाच्चानादित्तत्पदप्रयोगविषयतायाएव तत्पदवृत्तिव्याप्यत्वादनादिप्रयोगस्यैवच तदर्थसाधुत्वव्याप्यत्वात् । सादिप्रयोगस्तु शाक्तभ्रममूलकोऽपि रूपंवस्तित्यादौ वस्तुव्यञ्जनालक्षणो न भवत्येवसाधुः, साधुस्तु गंङ्गायां घोष इत्यादौ तटेपावनत्वध्वनिजननक्षम इतिप्रयोजनवत्ताप्रतिसन्धानमपि साधुत्वकल्पनायामेवोपयुक्तम्, नतु पदार्थस्मरणे वाक्यार्थबोधे वा, दृश्यते च 'अर्जुनार्जुन सात्यके ! भवतां मांसै दिशां बलिं करोमी'–त्यत्र द्विर्भावस्य कुपितो वक्तेति अतिवैयञ्जनकबोधसमर्थस्यैवसाधुत्वम्, नतु स्मरणे, वाक्यार्थबोधे वा तथाभूतस्येति निरूढिः ।

प्रयोजनवत्ताच वृत्तौ साधुतायाञ्चोपयुज्यते, साचानादिप्रयोगपरम्परास्वरूपा निरूढिः कोष व्याकरणादिनागृह्यते । मत्सरोऽन्यशुभद्वेषे तद्वत्कृपणयोस्त्रिष्विति, गुणेशुक्लादयः पुंसि गुणिलिङ्गास्तुतद्वतीतिकोषे गुणगुणिनोर्गृहीतायां पदस्य रूढौ या कल्पितावृत्तिः गुणेऽभिधास्वरूपैवपर्यवस्यत्यनन्यलभ्यत्वात् ।

गुणिनि तु लक्षणैवकल्पनालाघवात्। वेलापदस्य समुद्रसमवायिनिजले समुद्रसंयोगिनिस्थावरेस्थलेच तुल्यशरीरशक्तिरेव, नहिवेलापदादवयवावयविसाधारणसमुद्रत्वजात्यावोधः, परमाणोरनवगमप्रसङ्गात्, कर्तृकरणयोःतृतीयेतिसूत्रेण कृत्रिमति पाके कारणेच कृतिकरणयोर्वातृतीयानिरूढौ गृहीतायां तयाकल्प्यमानावृत्तिः कृतावभिधैवाभिधेयशरीरलाघवात्करणेलक्षणैव प्रतिपाद्यशरीरगौरवादित्यपरः पन्थाः।

अत्रप्रकाशकारैः कर्मणिकुशल इतिवाक्ये कुशलपदं दर्भग्रहणकर्तरि योगेनप्रवृत्तम्, विवेचकत्वसाधर्म्याल्लक्ष्यं लक्षयतीतिनिरूढां लक्षणामुदाजहार।

अत्रवदन्ति-पङ्कजादिष्वतिव्याप्तेर्मण्डपादिष्वसम्भवात्, तैलादिष्वपिचाव्याप्ते नैवयोगः प्रवर्तक इति येषांपदानामवयवानुपस्थितेऽपिपदार्थे अनादिः प्रयोगपरम्परा, तस्यतत्रशक्तिरेव, नत्ववयवार्थोपस्थितिमात्रान्वयानुभावकत्वम्। पङ्कजपदात्कुमुदस्य मण्डपपदाच्चमण्डपानकर्तुरन्वयबोधप्रसङ्गात, तैलपदेनसार्षपस्नेहानवगमप्रसङ्गादतोमण्डपवत् कुशलशब्दस्य दक्षे रूढिरेव, प्रत्युत कुशग्रहणकर्तर्येव रूढिपूर्विकालक्षणा। नतु दक्षेलक्षणासम्भवति, कुशलशब्दस्यवाक्यत्वेनालक्षकत्वात्तदेकदेशस्यशक्त्यापि लक्षकत्वेऽपावनिगमनाविरहाच्च।

अन्यथा घटपदान्तर्गत टकारादेरेव लक्षकत्वसम्भवेन नानावर्णघटितशब्दानांशक्तिरेवविलीयेत, सिद्धायाश्च मण्डपपदादेर्गृहविशेषादौरूढौ तया योगापहारान्मण्डपादौ लक्षणा।

इदमत्राकूतम्, मण्डपदं 'पाधातुड' प्रत्ययजन्यपदार्थोपस्थिति-सहकारेण 'मण्डप' मित्यानुपूर्वीज्ञानस्य मण्डपानकर्तृ कर्मताबोधोपधाने मण्डपपदं गृहविशेषे रूढमितिबुद्धभावोऽपिनिविशते, रूढि-ज्ञानजनितगृहोपस्थितिसहकारेण गृहकर्मताबोध-सामग्र्यान्तु मण्डपपदार्थान्वितद्वितीयार्थबोधसमर्थः मण्डपमितिपदमित्याकाङ्क्षाज्ञानमेवोपयुज्यते, तथाविधाकाङ्क्षाज्ञानसमवहिता मण्डपंभोजयेदित्यादौ-लक्षणाजन्योपस्थितिरेव तत्र कर्मताबोधयात। नतुमण्डपपदार्थान्वित द्वितीयापदार्थबोधसमर्थं मण्डपमिति पदमितिज्ञानेनसहकृता मण्डादिप्रत्येक पदार्थोपस्थितावच्छेदकमिति निष्कर्षः।

एतेन ध्वंसाधिकरणसमयध्वंससामान्यानधिकरणं न कोऽपि-कालः तत्तच्छाब्दबोधध्वंसाधिकरणसमयध्वंसाधिकरणत्वादीनामभावो नानुगमयितुं शक्यते इत्यादिसमाहितम्। विशेषाभावाना मुक्तक्रमेणासम्भवात्।

एवञ्चासिद्धकारणभावस्य गङ्गायां गुणइति शाब्दाभावस्य गङ्गापदजनित गङ्गास्मरणजनित तटस्मृतिघटितायां तटे गुण इति-शाब्दसामाग्र्यां कार्यक्षणावच्छेदेन तदव्यवहितप्राक्क्षणावच्छेदेनच कार्याधिकरणे सत्त्वमभिनिविशते, येन सत्यपि तट पूरयोः स्मरणे-युगपत्क्रमेण वा पूरे गुणइति, तीरे गुण इति च प्राप्तबोधयोरुत्पादं वारयन्ति।

पूरेगुण इति शाब्दबुद्धौतु समानविषयकशाब्दबोधस्य पृथगेव प्रतिबन्धकत्वम्, येन सत्यामपि 'पुष्कलायां मामाग्र्यां न धारावाहिकोऽन्यूनानतिरिक्तविषयक वाक्यार्थबोधक्रमः।

अथान्यत्र क्लृप्तकारणभावस्य शाब्दबोधाभावस्य लाक्षणिक पदप्रयोज्य वाक्यार्थबुद्धिसामग्र्यां कार्यसहभावेन समानविषयकशाब्दसामग्र्याञ्च पूर्ववर्तितामात्रेण प्रवेशइत्येव युज्यते । ननुशाब्दबुद्धौ शाब्दबुद्धेः प्रतिबन्धकत्वान्तरमितिचेन्न, कार्यता वच्छेदकधर्मानवलीढ़-कार्यप्रयोजकसामग्र्यां तत्कार्यतावच्छेदकधर्मावलीढ़म्प्रति जनकस्य प्रवेशासम्भवात् । न खलु पूरेगुण इतिशाब्दाभावस्यजन्यताव-च्छेदकः कथितशाब्दबोधविशिष्टान्यजन्यबुद्धिस्वरूपोधर्मः पूरेगुण इति-शाब्दबुद्धि मप्याक्रामति ।

नच कारणताभेदाभावे तस्यैवकारणस्यक्वचित्कार्यसह-भावेन क्वचिच्च पूर्ववर्तितामात्रेण सामग्र्यनुप्रवेशः सांदृष्टिक इति शाब्द-बुद्धित्वावच्छिन्नंप्रति समानविषयकस्य शाब्दबोधस्य शाब्दबोधत्वेन निर्णयत्वेन वा प्रतिबन्धकत्वमवश्यं प्रवेशनीयमितिदिक् ।

ननु गङ्गापदादेस्तटादावभिधैवोचिता अभिधाजनितपदार्थो-पस्थितावेव तदर्थविषयकान्वयानुभवजनकत्वावधारणात् । नच गङ्गा-पदस्य स्वशक्यार्थानुभावकत्वे सम्भूयान्वयबोधकत्वस्वरूपा गङ्गापद-घोषपदयोराकाङ्क्षापिसुघटेतिचेत् ।

उच्यते—"लक्षकस्याभिधालक्ष्येग्राहकाभावबाधिता पदोपात्तेन चार्थेन साकाङ्क्षंस्यात्पदान्तरम्" गङ्गापदादेस्तटादौ तावदभिधान-केनापिप्रमाणेन व्यवहार कोष व्याकरणादिनाग्राह्यते । अगृहीता-यामपि चाभिधायां शक्यसम्बन्धेनावगम्यते, तटादेरन्वयबोधस्यानु-भविकत्वादनभिधेय एव गङ्गापदादेस्तटादिः, क्वचिद्व्यवहारदर्शिनां तटादौगङ्गादिपदशक्तिग्रहो भ्रमएवाग्रिमेणविशेषदर्शनेनबाध्यते,

गङ्गापदसमभिव्याहृत घोषपदत्वावच्छेदेन प्रवाहस्मारितार्थान्वितघोष-पदार्थबुद्धभावप्रयोजकाभावप्रतियोगित्वस्वरूपाकाङ्क्षा गृह्यमाणा-गङ्गापदजन्य पूरस्मरणजन्य तटस्मरणसहकारेण तटे घोष इत्यन्वय बुद्धिं जनयति ।

भवतुवागङ्गापदार्थान्वितघोषपदार्थबुद्धिसमर्था गङ्गायां घोष इतिसमभिव्याहार इत्याकारामुख्यार्थमादायाकाङ्क्षाबुद्धिरेव मुख्या-र्थस्मरण तदयोग्यताज्ञानाभावादिसहकारेण मुख्यार्थान्वयबुद्धिं मुख्यार्था-योग्यत्वज्ञानाधीन लक्ष्यार्थस्मरणादिसहकारेण लक्ष्यार्थान्वयबुद्धिं जनयतीतिन लक्ष्यार्थबोधौपायिकी पृथगाकाङ्क्षा इतिपक्षः ।

ननुगङ्गापदेन स्वशक्यप्रवाह सामीप्यलक्षणपरम्परया तट-मेव स्मारितम्, तत्तदन्वयबुद्धिविषयोभवतु किं स्मरणद्वयाङ्गी-कारेणेति ।

उच्यते—"प्रायः प्राग्गृहीत्वापिसम्बन्धं पदलक्ष्ययोः पदेन-शक्यं शक्येन लक्ष्यं स्मृत्वान्वयं विदुः" येन पुंसा पदस्य परम्परा-सम्बन्धोनावगतः किन्तु पदस्य शक्तिः प्रवाहे प्रवाहस्य सामीप्ये, तटे प्रागवगते सोऽपि गङ्गायांघोष इतिवाक्यात्तटे घोष इत्यन्वयं वेत्ति । तदनुरोधेन गङ्गापदस्मारितपूरजन्यतटस्मरणस्य तटानुभवं प्रत्यवश्यं कल्प्यकारणभावतया गङ्गापद परम्परासंसर्गस्य तटस्मारकताया स्त-थाविध तटस्मरणस्यानुभवजनकतायाश्च कल्पने प्रमाणाभावः । ननु पदानां शक्यत्वस्य साक्षात्संसर्गस्येव शक्यसम्बन्धादिस्व-रूपायाः परम्पराया स्मरणस्यानुभवजनकताया अपि स्मारकत्वमव-र्जनीयम् ।

एवं तटं परम्परया गङ्गापदवदित्याकारकस्यसंस्कारस्य ज्ञानस्य वा शुद्धतटस्मरणजनने गङ्गापदसहकारित्व कल्पनमपि सकलानुभवानुरोधितया युज्यत एव। गङ्गापदज्ञान (जन्य) ज्ञान विशिष्टायां बुद्धौ गङ्गापदज्ञानस्य तट गङ्गापदसंसर्गावगाहिसंस्कारादेः स्वविशिष्टायां बुद्धौ जनकताकल्पनमपि।

तथा च गङ्गापदपरम्परावगाहिज्ञानादिजन्यं तटस्मरणमेव लाघवादनुभवजनकम्, नतु गङ्गापदशक्यत्वावगाहिज्ञानादिजन्य गङ्गापदार्थस्मरणेन गङ्गासम्बन्धितटमितिज्ञानादिना च जनितस्य तटस्मरणस्य शरीरगौरवादिति चेन्न। तटानुभवंप्रति गङ्गापदशक्या गङ्गेतिज्ञानादि जन्यस्य गंगास्मरणस्य तटस्मरणव्यापारिकायां जनकतायामेव लाघवात्। व्यापारस्यतु गङ्गापदार्थं संसर्गावगाहिज्ञानादिजन्य तटस्मरणत्वेन तटस्मरणत्वेनैव वा जनकत्वम्, गङ्गापदजन्यप्रवाह स्मरणजनित तटस्मरणत्वेनतु सामग्र्यामनुप्रवेशः तेन विरतेऽपि गङ्गापदजन्ये गङ्गास्मरणे तज्जनिततटस्मरणाधीन तटानुभवोजायते, नजायते च सम्बन्धान्तरज्ञानाधीनमानान्तराबगत प्रवाहजनिते च तटस्मरणे सत्यपीति दिक्।

चिन्तामणिकृतो लक्ष्यस्मरणे पदजन्मनि अनुभावकतामूचुर्न शक्यस्मरणोद्भवे। गङ्गापदज्ञानत्वावच्छिन्न प्रतियोगिताकाभाव प्रयोज्याभावप्रतियोगितावच्छेदक तटस्मरणत्वावच्छिन्नस्य गङ्गापदज्ञानाव्यवहितोत्तरोत्पत्तिकतटस्मरणत्वेन तटानुभवे कारणत्वम्। तेनगङ्गापद तटयोरभिधयाभिधेयसम्बन्धेनवा जनितं तटस्मरणमुपगृह्यते, नतु गङ्गासाक्षात्कारादि प्रभवम्।

नच गङ्गापदेनदैशिकाधिकरणविधया स्मारितस्यतटस्या-न्वयबोधानुप्रवेशोद्देश्यः गङ्गापदवृत्तिप्रकारक तटगोचर संस्कारा-व्यवहितोत्तरत्वस्यापि तटस्मरणे विशेषणविशेषणत्वात् ।

यदि च सत्यपि गङ्गापदवृत्तिमत्तटपदमिति संस्कारेण गंगापदवृत्तिमत्तटपदमिति भ्रमकाले गङ्गापदाधिकरणदेशतयापदा-दुपस्थितस्यापितटस्य नान्वयः तदागङ्गापदवृत्तिप्रकारक तटगोचर-निर्णयजन्य तटस्मरणत्वेनैव तटानुभवजनकं वाच्यम् । यत्रगंगापद-स्य गंगायां रूढे गंगायास्तटे सामीप्यस्य च खण्डश एव प्रागननु-भवस्तत्र गंगापदसाक्षात्कारानन्तरं गंगापदशक्यं गंगासमीपंतटमिति विशिष्टस्मरणासम्भवेऽपि खण्डस्मरणमूलिका मानसीविशिष्टबुद्धिर-भ्युपेतव्या । तदधीनातटस्मृतिरेव तटानुभव बोधाङ्गम् । (सांसर्गिक-विषयतानिरूपितम्) ।

नच तथापि शक्ति लक्षणोभयसाधारणस्य वृत्तित्वस्यैकस्या-भावाद्गङ्गापदशक्यं तटमितिभ्रमाद् गङ्गापदशक्य गगासंयुक्तंतट-मितिप्रमितेश्च जायमानयोस्तटस्मरणयो रैकरूप्येण कारणत्वानुपपत्ति-रितिवाच्यम् । गंगापदत्वावच्छिन्न प्रकारतानिरूपिताभिधात्वा-वच्छिन्न सांसर्गिकविषयतानिरूपितविशेष्यत्वानिरूपकज्ञानानिरूपिता या तटत्वावच्छिन्ना मुख्यविशेष्यता, तन्निरूपकनिर्णयजन्य तट-स्मरणत्वेनैव तटानुभवजनकत्वादनेनैव च रूपेणाभिधया गङ्गापद-वत्तटमिति गंगाभिधेयाभिन्नंतटमिति गंगापदाभिधेय गंगासंयुक्तं तट मित्येवविधनिखिलवृत्तिज्ञानजनित तटस्मरणानामुपग्रहः ।

नोपगृह्यते च गंगापदाभिधेया "गंगातटं पार्थिव" मितिज्ञाने न तटावच्छिन्नस्य "गंगापदाभिधेयागंगे" तिबोधेन च जनितातट-

स्मृतिः। पार्थिवत्वप्रकारतानिरूपिततटत्वावच्छिन्नविशेष्यतायास्तथाविधविशेष्यत्वानिरूपकज्ञाननिरूपकत्वात्। अवच्छिन्नत्व विशेषणतापन्न तटविशेष्यताया मुख्यत्वाभावाच्च। वस्तुतः पदप्रकारतानिरूपिताभिधासंसर्गत्वानिरूपकज्ञानानिरूपितत्व मेव तटविशेष्यतायां प्रवेशनीयम्।

तेनाभिधागंगासामीप्यानां परस्परनिरूप्यनिरूपकभावापन्ना, यत्रसांसर्गिकविषयता तस्यस्वाभिधेयगंगासामीप्येनसम्बन्धेन गंगापदवत्तटमित्यस्य यत्र गंगापदस्याभिधयासंसर्गेण गंगायां तस्याश्च सामीप्येनतटेवैशिष्ट्यमवगाहमानो विशिष्टवैशिष्ट्यबोधस्तस्यचोपग्रहः।

यदिचाभिधातदधिकरणघटितसंसर्गेण पदप्रकारकस्तटविशेष्यको वृत्तिग्रह एव शाब्दबोधङ्गम्, नतु मध्येऽभिधेयादिपदार्थविशेषणकोऽपीत्युच्यते, तदातटत्वावच्छिन्नविशेष्यतानिरूपित गंगापदत्वावच्छिन्नप्रकारतानिरूपिताभिधानिष्ठ सांसर्गिकविषयतानिरूपिताधिकरणविषयताकत्वेन वृत्तिग्रहोऽनुगमनीयः। स्वाभिधाप्रतियोगिकाभावादिसंसर्गेण पदप्रकारकबुद्धिवारणायाधिकरणविषयतापि प्रवेशिता। अभिधेयाभावादिश्च सम्बन्धो लक्षणैव।

"गुणाः ज्योत्स्ना कुहूर्बर्ज्यं" इत्यत्र गुणपदस्य ज्योत्स्नासदृशगुणविरहिणि कुहूसदृशाभेदान्वययोग्ये ऽभिधेयाभाव एवहि निरूढलक्षणास्वरूपः।

प्रयुञ्जते च कवयः—सौजन्याम्बुमरुस्थलीसुचरितालेख्यद्विभित्तिर्गुणाः। ज्योत्स्ना कृष्णचतुर्दशीसरलतायोगेश्वपुच्छच्छटा, यैरेषापिदुराशयाकलियुगे राजावलीसेविता, तेषांशूलिनिभक्तिमात्रसुलभे सेवा कियत्कौशलम्।"

अथ गंगापदस्यदैशिकाधिकरणं तटो गंगापदाभिधेयो नवेतिज्ञानेन स्मारितस्य तटस्यान्वयबुद्धिप्रसङ्गः। गंगापदाभिधेयत्वाभावप्रकारतानिरूपित तटत्वावच्छिन्नविशेष्यताशून्यत्वमपि वृत्तिग्रहे प्रवेशनीयमितिचेन्न। "तटो नाभिधेयः किन्त्वभिधेयसम्बन्धीति-बुद्धिसंग्रहप्रसङ्गात्।

नन्वधिकरणविषयतानिरूपिताभिधासंसर्गतानिरूपित गंगापदत्वावच्छिन्नप्रकारतानिरूपिततटत्वावच्छिन्नविशेष्यतायां गंगापदत्वानवच्छिन्नप्रकारत्वानिरूपितत्वं प्रवेश्य वृत्तिसंशयोव्यावर्तनीयः, एकस्या एव संशयविशेष्यताया विरुद्धकोटिद्वय प्रकारतानिरूपकत्वाभ्युपगमाद्वृत्तिगोचर स्मरणजन्य तटस्मरणत्वेनैवानुभावकत्वं वा वक्तव्य, मितिचेन्मैवम्।

अभिधयासंसर्गेण पदाभाववति पदप्रकारकमिदंज्ञानमित्यप्रामाण्यज्ञानाभावस्य वृत्तिग्रहंप्रत्यविशेषणत्वे तथाविधप्रामाण्यज्ञानास्कन्दितां "तटमभिधयापदवदि" तिवृत्तिभ्रमेऽप्यनुभावक तट स्मरणस्य प्रसङ्गात्। विशेषणत्वे "तटंगंगापदस्याभिधेयं लक्ष्यञ्चे" तिवृत्तिसमूहालम्बनात् कथिताप्रामाण्यज्ञानास्कन्दिता दुत्पन्नस्य तटस्मरणस्याननुभावकत्वप्रसङ्गादिति।

उच्यते. भवतुलक्ष्यार्थस्मरणस्य पृथगेव कारणत्वम्, तथापि पदप्रकारक लक्षणासंसर्गक लक्ष्यविशेष्यकनिर्णयजन्यत्वेनैव जनकत्वम्, नतुशक्तिज्ञानजन्यशक्यस्मरण जन्यत्वेसतिशक्यलक्ष्यसंसर्गज्ञानजन्यत्वेन। अन्यतात्रयप्रवेशे गौरवात्।

अथ तटस्मरणत्वेनैव तटानुभवं प्रतिजनकत्वम्, गंगापदजन्य प्रवाहस्मृतिस्तु गङ्गानुभवसाधारणम्, गंगापदजन्यगंगास्मरणविशि-

ष्टत्वमेव अन्यतावच्छेदकम् । तटानुभवसामग्र्यास्तु गंगापदशक्तिग्रहजनित गंगास्मरणजन्यतटस्मरणत्वेनानुप्रवेश स्तस्येति चेन्न ।

अकारणतावच्छेदकरूपेण कारणस्य सामग्र्यनुप्रवेशासम्भवात्तु तटोपस्थितित्वेन तटानुभवजनकता, गंगापदजन्य गंगास्मरणस्य तु सव्यापारिका कारणता कार्याव्यवहितपूर्वक्षणवृत्ति व्यापाराव्यवहितपूर्वक्षणावच्छेदेन कार्याधिकरणे विद्यमानस्याभावस्य प्रतियोगितानवच्छेदकोधर्मः सव्यापारक कारणतेत्यस्यार्थः । तटे घोष इत्यनुभवजनकसामग्र्यां तु, कार्याव्यवहितपूर्वक्षणावच्छेदेन यत्किञ्चित्तटघोषानुभवकालवृत्तिसमवायसंसर्गावच्छिन्न कार्यतानिरूपककारणकूटान्तभूत तटादिपदार्थोपस्थित्यव्यवहितपूर्वक्षणावच्छेदेन गंगापदशक्तिग्रहजनितप्रवाहस्मरणवत्तत्कार्याधिकरणक्षणावच्छेदेन "प्रवाहे घोष" इत्यादि शाब्दबोधाभावादिस्वरूपकार्यसहभूत कारणवत्ता चात्मनि निविशते ।

तथा च यत्क्षणावच्छेदेन मुख्यार्थशाब्दबोधाभावादिस्वरूपकार्यसहभूतकारणाधिकरणत्वे यदव्यवहितपूर्वक्षणावच्छेदेन तटाधिकरणता घोषादिपदार्थस्मरणाकाङ्क्षाज्ञानयोग्यतानिर्णयाभावादिमत्त्वे च सति यत्क्षणाव्यवहितपूर्ववर्तितटोपस्थित्याद्यव्यवहितपूर्वक्षणावच्छेदेन सप्तमीपद, घोषादिपदशक्तिग्रह, गंगापदजन्यगंगास्मरणानामधिकरणं च यस्यात्मा, स तत्क्षणावच्छेदेन तीरेघोष इत्यादि शाब्दबोधोत्पत्तेरधिकरणमित्युदाहरणशरीरं पर्यवस्यति । शक्यपदार्थोपस्थितेरपि न शक्तिग्रहजन्यत्वेनकारणत्व मपितु शक्तिग्रहस्य सव्यापारिकारणतैवेतिचे, देवमपि तटोपस्थित्यव्यवहितपूर्वक्षणावच्छेदेन गंगापदप्रकारक क्षणासंसर्गकतटविशेष्यकग्रहाधिकरणतैव

प्रवेशयितु मुचिता । तटग्रहस्यैव च तटोपस्थितिव्यापारिका जनकता, नतु शक्तिग्रहजनितस्य शक्यार्थस्मरणस्य, शक्तिग्रहजन्यशक्यस्मरणत्वेनकारणतायाः अपूर्वायाः कल्पनप्रसङ्गात् ।

लक्षणासंसर्गक पदप्रकारकग्रहस्य तु पदविशिष्ट वैशिष्ट्यबुद्ध्यादौ क्लृप्ततयैव कारणतायानिर्वाहात् । यदितु तटस्मरणव्यापारिकेषु लक्षणाग्रहस्य पृथगेव कारणता, अत्रहि स्वाव्यवहितोत्तरवर्तितटस्मरणाव्यवहितोत्तरक्षणोत्पत्तिकबुद्धित्वं कार्यतावच्छेदकम्, अन्यादृशमेव च निरुक्तनियतपूर्ववर्तित्वम्, अन्यथाविनश्यदवस्थवृत्तिग्रहजनितपदार्थोपस्थितिप्रयोज्यस्य शाब्दबोधस्यासंग्रहप्रसङ्गादित्यपूर्व कारणताकल्पनमुभयत्रापि समानमितिविभाव्यते । तदापिलक्षणासंसर्गेण पदप्रकारकलक्ष्यविशेष्यकज्ञानत्वापेक्षया गौरवादभिधासंसर्गेण पदप्रकारकशक्यविशेष्यकज्ञानजन्यशक्यस्मरणत्वेन कारणतायां गौरवमेव महद्बाधकम् ।

किञ्चागृहीतगोपदशक्तिकस्यापि गामुच्चारयेत्यादिवाक्याद् गोशब्दविषयको वाक्यार्थबोधो लक्षणया जायते । नच तत्रगोपदशक्तिजन्या गवोपस्थितिः सम्भवति । किन्तुस्वाभिधेयाभिधायकत्वसंसर्गेण पदप्रकारिका पदार्थविशेष्यिका बुद्धिरनायत्या पदस्मारिका वाच्येत्यन्यत्रापि तथा, यदिच शब्दस्वरूपं मानान्तरावगतमेव शाब्दबोधविषयो, यदि वा स्वरूपेऽपिशाब्दानामभिधा, पाणिनिसंकेतोवावृत्ति, रन्यथा य, व, ग, ड, 'दशमाहे' त्यादौ निरर्थकशब्दानामानुपूर्वी विशेषप्रकारेण वाक्यार्थबुद्ध्यनुप्रवेशो न स्यात् ।

यत्तु जकारादिप्रत्येक वर्णशक्तिघटिता तत्र लक्षणा । समाहार द्वन्द्वाचद्वितीयाविभक्तिरितिमतम्, तच्चिन्त्यम् । खण्डशकारान्त-

द्वन्द्वपुंस्येकवचनानुपपत्तेरित्युच्यते। तथापि दशरथादिपदेन दशरथपदशक्यविशेष्यमगृहीत्वापि दशरथपदवाच्यत्वावच्छिन्नानुभवस्यानुपपत्तिः। एतेन शक्यविशेषान्तर्भावेणैव लक्षणा ज्ञानंकारणमितिप्राचीनमतनिगर्वोऽप्यपास्तः।

ननु दशरथविशेष्यक दशरथपदजन्यबुद्धित्वावच्छिन्नोद्देश्यताकसंकेतस्वरूपायाः दशरथपदशक्तेः दशरथत्वाज्ञाने ज्ञानासम्भवात्तद्घटिता लक्षणाकथं गृह्येतेतिचेन्न। दशरथ पदजन्यबुद्धित्वावच्छिन्नायाः संकेतोद्देश्यतायाः निरूपकेन विषयतात्वावच्छिन्नावच्छेदकत्वेन निरूपितस्यावच्छेदकत्वस्याभिधापदार्थत्वात् तस्यावच्छेदकतायाः सपदि दशरथत्वावच्छिन्नत्वमगृहीत्वापि तथाविधावच्छेदकतावद्वस्तु तादात्म्यंदशरथपदवोध्यत्वावच्छेदेन वोद्धुं शक्यमित्यवधेयम्।

ननु गंगापदशक्यसम्बन्धितटपदमिति, गंगापदशक्यगंगासम्बन्धितटमिति च निर्णयात्मकमेवज्ञानं तटानुभवे स्मरणजनकम्, तयोश्च गंगापदत्वावच्छिन्नप्रकारतानिरूपितशक्यविषयतानिरूपितसम्बन्धविषयतानिरूपित तटविशेष्यताकत्वमात्रेण जनकत्व, मितिचेन्न। शक्यसम्बन्धेन गंगापदविशिष्टंगंगापदशक्यं गंगावनतटंवे त संशयादपि तदापत्तेः।

नच तटत्वावच्छेदेन गंगापदवाच्यशक्यसम्बन्धत्वावच्छिन्न सामान्याभावानवगाहित्वेनेतिगंगापदशक्यसम्बन्धितटावगाहित्वेन तथात्वम्, तटं गंगापदशक्यगंगासम्बन्धिनवेतिज्ञानादपि तदापत्तेरितितटत्वावच्छेदेन गंगापदवाच्यसम्बन्धत्वावच्छिन्नाभावानवगाहित्वे सति गंगापदत्वावच्छिन्न प्रकारतानिरूपिताभिधासंसर्गतानिरूपित संयोगसंसर्गतानिरूपित तटत्वावच्छिन्न विशेष्यताकज्ञानत्वेनैव कारणत्वं वक्तव्यम्।

तथाच स्वशक्य गंगासंयोगेन गंगापदप्रकारकनिर्णयस्य पृथगेव कारणत्वमावश्यकमिति ।

मैवम् । लक्षणासंसर्गावच्छिन्नगंगापदप्रकारताभिन्न प्रकारत्वानिरूपित तटत्वावच्छिन्नविशेष्यताकत्वेन संशयवारणसम्भवात् । संशयेविरोधिकोटिद्वयप्रकारताद्वयनिरूपितायाः एकस्या एव विशेष्यतायाः स्वीकारात् । अन्यथा लक्षणासंसर्गस्यलक्षणासंसर्गेण गंगापदस्य चाव्याप्यवृत्तिग्रहणकालोत्पन्न तटत्वावच्छेदेन गंगापदलक्षणां तदभावञ्चावगाहमानस्य समुच्चयस्य संशयत्वप्रसङ्गदुर्वारतापत्तेः ।

वस्तुतोऽभिधेयतावच्छेदकघटितलक्षणाग्रहजनित पदार्थोपस्थितेपृथगेव कारणत्वम्, तद्घटितसामग्र्यां रूढिज्ञानानुप्रवेशः । शक्यतावच्छेदकमिश्रितघटितं(ते)लक्षणाग्रहजन्या पदार्थस्मृतिस्तटलक्षकम् । गंगापदं तटेगंगाधर्मबोधकमित्यादिप्रयोजनवत्ताप्रतिसन्धानमपेक्ष्य तटमनुभावयति, नान्यथेतिव्यक्तमुपरिष्टात् ।

नन्वेवमनादिपरम्परास्वरूपायारूढेः "कलिङ्गोरिङ्गती" त्यादावश्यवेद्यत्वे रूढ्या संसर्गेण पदप्रकारिकायाबुद्धेरेव लक्ष्यानुभावकपदार्थस्मरणजनकत्वमस्तु, किं लक्षणया । अतएव पङ्कजपदात्तत्प्रयोगपरम्परयैवोपस्थिते, पद्मे न योगार्थान्वयः सम्भवति । तत्रशक्तिरपि न कल्पनीये, ति चेन्न । गवापदेऽप्येवं शक्तिकल्पनापत्तेः । तथासति अनादिप्रयोगपरम्परयैव सर्वत्रपदार्थोपस्थित्या वाक्यार्थबुद्ध्युपपत्तौ निषादस्थपत्यधिकरण ? विरोधापत्तेः । कर्मधारयपक्षे निषादस्य, षष्ठीतत्पुरुषपक्षेनिषादसम्बन्धिनश्चप्रयोगपरम्परायामविशेषेण षष्ठीसमासस्य जघन्यत्वानुपपत्तेः, तस्मान्मुख्यार्थबोधोपजीवक-

मुख्यार्थान्वयबोधाभावसहभावनियततया प्रयोजनवल्लक्षणास्थले कल्प्ताया। लक्षणाजन्योपस्थितेरेव निरूढलक्षणास्थलेऽपि कल्पनमुचितम् । मुख्यार्थान्वयबोधसामग्रीमत्तया 'निषादस्थपतिं याजये' दित्यत्र निषादसम्बन्धिनं निषादस्थपति मित्यन्वयबोधोनोत्पद्यत इत्येव षष्ठीसमासस्य जन्यत्वमित्यवधेयम् ।

एवञ्च पदस्य साक्षाद्वृत्तिरेवलक्षणा । शक्तमिव लाक्षणिक मनुभावकमेवेति चिन्तामणिकारचरण पङ्कजच्छायाश्रयीपन्थाः ।

साचेयं लक्षणा संक्षेपतो द्विधा—निरूढाप्रयोजनवती चेति । तत्रच निरूढिस्तु तत्पदाधीनतदर्थप्रतिपत्तिषु सर्वास्वेवसजातीयबुद्धिध्वंसविशिष्टता । कलिङ्गपदप्रयोज्यपुरुषबुद्धित्वव्यापक कलिङ्गपदाधीनपुरुषबुद्धिध्वंसविशिष्टा पुरुषबुद्धिरेव निरूढिः । तेनससर्गेण "कलिङ्गपदविशिष्टः पुरुषइतिज्ञानेन", "कलिङ्गपदशक्यजनपदवासीपुरुष" इतिलक्षणाज्ञानेन च जनिता पुरुषोपस्थितिः पुरुषान्वयबोधाङ्गम् । तेन "कलिङ्गोरिङ्गती" ति वाक्यश्रवणानन्तरं कलिङ्गोरिङ्गत्यारुपातानां स्मरणम् ।

अथ रिङ्गतेः शक्यं कर्म, आख्यातस्यकृतिः, कलिङ्गपदस्यनिरूढोलक्षयः, "पुरुषः कलिङ्गइतिपदेनसहसाकाङ्क्षं रिङ्गतिपद मितिस्मरणम् । अथ पुरुष कर्म कृतीनांस्मरणम् । अथ पुरुषोरिङ्गणकृतिमानित्यन्वयबोध इति प्रक्रिया । तत्रनिरूढिजन्य पदार्थोपस्थितिमात्रस्यापेक्षणीयत्वे मुख्यार्थशाब्दबोधेविरोधिनां मुख्यार्थबाधादीनामन्वयव्यतिरेकानुविधानं न घटते । लक्षणाजन्योपस्थितिघटित शाब्दबोध सामग्र्या मेव मुख्यार्थ शाब्दबोधादेरभावस्यघटकत्वात् । अतो लक्षणाजन्योपस्थितिरप्यत्रनिविशते ।

भवतु वा निरूढेर्ज्ञानं साक्षादेव शाब्दबोधजनकम्। नतु पदार्थोपस्थोपकतया, अतएव पदार्थोपस्थितिसमानकालिकेन निरूढि-ज्ञानेनापि शाब्दबोधः। एतेन प्रयोजनवत्ताप्रतिसन्धानघटित साम-ग्रीतो निरूढिज्ञानजनितपदार्थोपस्थितिघटितसामग्र्याः पृथक्त्वावश्य-कत्वे तत्र पृथगेवशाब्दसामग्र्याघभावप्रवेशसम्भवे किमत्रलक्षणाज्ञान-जनितया पदार्थोपस्थित्येत्येकासरणिः। अनादिपरम्परास्वरुपायाः रूढेर्ज्ञानं तस्मिन्नर्थे तस्यपदस्यवृत्तिमत्तायाः साधुत्वस्य च कल्पनाया-मेवोपयुज्यते। नतु पदार्थस्मरणेवाक्यार्थबोधेवा। सादिप्रयोगस्य शक्तितस्तस्या रूढिज्ञानाभावघटितसामग्र्यनुप्रवेशत्वादिति मणिकृत-स्तु मण्डपंपश्येत्यादौ यत्ररूढ्यर्थस्य योगार्थस्यान्वययोग्यत्वं तत्र योगार्थोपस्थितिघटितसामग्र्यां रूढिज्ञानाभावः प्रविशत्येव, नहि समभिव्याहृतपदान्तरनिरूपिताकाङ्क्षा मस्पृशन्ती प्रकृतिप्रत्ययो राकाङ्क्षाबुद्धिः शाब्दबोधायप्रभवति। मण्डपंस्पृहयतीत्यत्रापि मण्डपकर्मता बुद्धिप्रसङ्गात्। यत्र तु मण्डपंभोजयेत्यानुपूर्वीघटिता-काङ्क्षायाः ज्ञानेन समवहिता मण्डादि प्रत्येकपदार्थोपस्थितिगर्भा-सामग्री तत्ररूढिज्ञानस्य तज्जनितरूढ्यर्थोपस्थितेर्वाभावोननिविशते मानाभावात्।

अतएव वर्षासुरथकार आदधीतेत्यत्र "वैश्याशूद्र्योस्तु राज-न्यान्माहिष्योग्रौ सुतौस्मृतौ। वैश्यात्तुकरणः शूद्र्यांविन्नास्वेषविधिः स्मृतः। माहिष्येण करण्यान्तु रथकारः प्रजायत" इति वाक्येन जातिविशेषवति रथकारपदस्य रूढौग्राहितायां रथकर्मकरणाश्रयो योगान्न प्रतीयते, रूढ्यर्थान्वयसम्भवस्थलीय योगार्थोपस्थितघटित-सामग्र्यां रूढिज्ञानाभावादेः कार्यसहभूतरूढ्यर्थविषयकानुभवाभाव-

स्यानुप्रवेशात्। अतएव रथकारस्याधानासिद्धेतदुपपादिकोविद्यापिकल्प्यते। यत्र च योगार्थेतात्पर्यम् प्रकरणादिनावधार्यते तत्ररूढ्यर्थानुभवस्य तेनैव तात्पर्यग्रहेण प्रतिबन्धाद्रूढ्यर्थानुभवाभावस्य कार्यसहभावेनसत्त्वात्तथाविधतत्तात्पर्यघटितायां सामग्र्यां रूढिग्रहाभावादेरनुप्रवेशाच्चयोगोपस्थितिरेवार्थोऽनुभूयते।

यथा "तप्तेपयसिदध्यानयति वैश्वदेव्यामिक्षावाजिभ्यो वाजिन" मितिश्रुतौपयःसंस्कारेणतापन दधिसंयोगादिना आमिक्षाजलविभक्तो दुग्धावयवोजन्यते सएव पयः संस्कारोद्देश्यः। तस्य विनियोगाकांक्षाया 'मामिक्षावैश्वदेवी' त्युत्पत्तिवाक्यमुपतिष्ठते। तत्र विश्वेदेवपदस्यस्वरूपे, गणदेवताविशेषेचवृत्तिः। तद्धितस्यचतुर्थ्यन्तत्वं क्रतुकर्मचार्थः। तत्र चतुर्थ्यन्तत्वं विश्वेदेवपदस्वरूपे, तच्च करणकार्यभावेन क्रतौ, तत्रगणदेवताना मुद्देश्यत्वेनान्वयः, तेनचतुर्थ्यन्त विश्वेदेवपदकरणकस्य गणदेवताविशेषोद्देश्यकस्य क्रतोः कर्मामिक्षा इत्यन्वयबोधः।

एवञ्चामिक्षादैवतत्वेनोपास्यत्वेनान्वयः। तेन चतुर्थ्यन्त विश्वेदेवपदकरणकस्य गणस्थितेषु विश्वेदेवेषु वाजिपदतात्पर्यग्रहेण वाजस्यान्नस्य स्वामिभ्य इत्येवं योगार्थएव 'वाजिभ्य' इतिपदेनोपस्थाप्यते।

यथा "वाग्निर्वसुभिः सोमोरुद्रै रिन्द्रो मरुद्भिः वरुण आदित्यैर्बृहस्पतिर्विश्वदेवै" रित्यत्र विश्वेदेवपदेनगणदेवत रूढेनापि प्रकरणोपादानगृहीततात्पयकाः सर्वेदेवा एवोपस्थाप्यन्ते। ननु गणदेवताविश्वपदमिवविश्वपदमपि गणदेवताविशेषरूढम्, "आदित्यविश्ववसव" इत्यभिधान कोषोवैदिकदेशोत्कीर्तनपरः। भीमसेने भीमपदवदितिवदन्ति।

एवञ्च देशवाचिनः एव कलिङ्गपदस्य तद्वासिनिपुरुषे इन्द्रियार्थस्य चक्षुःशब्दस्य तदधिष्ठानगोलके, क्षत्रियद्वयवाचिनो नित्यद्विवचनान्तस्य गोद शब्दस्य, तन्निवासग्रामे, पाञ्चालविदेहादिपदानित्यबहुवचनान्तानां तन्निवासिजनपदे च निरूढ़िलक्षणा। 'कलिङ्ग' साहसिकः। 'पौण्डरीकंचक्षुः' 'गोदोग्रामः' 'पाञ्चाला' 'विदेहा' वा जनपद इत्यादि निर्विचिकित्समुदाहरणीयम्।

अथ निरूढ़िपदार्थंनिरूप्य प्रयोजनपदार्थोनिरूप्यते। ''प्रयोजनन्तु व्यङ्ग्यार्थप्रतिपत्तिसमर्थयातत्पदाधीनयाबुद्ध्यालक्ष्यस्य विषयीक्रिया "लक्षणाधीनलक्ष्यपदार्थविषयक बुद्धौ व्यङ्ग्यार्थप्रतिपत्तिसमर्थ्य मेव प्रयोजनम्, प्रयोगसाधुतासम्पादकम्। वैयञ्जनिकबुद्धित्वस्वरूपमानसत्वव्याप्यजात्यवच्छिन्ने लक्षणाजन्यबुद्धिरन्वयव्यतिरेकाभ्यां कारणमितिस्पष्टमुपरिष्टात्।

निरूढ़लक्षणात्वंप्रयोजनवल्लक्षणात्वम्। परस्परविरुद्धौ धर्माविति विभ्रमः। कौण्डपायिनामयननामनिष्कृतौ प्रक्रान्ते ''अग्निहोत्रं जुहोती "ति" श्रूयमाणस्याग्निहोत्रपदस्यनित्यहोमेरूढ़स्य, अग्नयेहोत्र मिति केवलयोगार्थे निरूढ़लक्षणाया नित्याग्निहोत्रधर्माणामितिदेशकत्वदर्शनाल्लक्ष्यार्थेऽवगते लक्षकस्माग्निताना मितिकर्तव्यतानां व्यञ्जनया वैशिष्ट्यावगम एवह्यतिदेशपदार्थः।

नन्वितिकर्तव्यताबोधक वाक्याध्याहारेण तदेकवाक्यतापन्न प्रधानविधिनान्वयबोधोत्तरजननम्। एवंहि सति अतिदेशप्राप्तानामवघातादीनां कृष्णलेवैतुष्यव्यापार बाधाद्बाधः। "सौर्यं चरुन्निर्वपे" दितिविहितायामाग्नेययागनिकृतौ सौर्येष्ट्यौ प्रकृतिवद्विकृतिन्यायेनातिदेशात्प्राप्तस्याग्नयेत्वा जुष्टं प्रोक्षामी" ति मन्त्रस्य देवतास्मर-

णरूप व्यापारबाधेन मूर्यायेत्यूहश्च न सिद्धयेत्, श्रुतिप्राप्तेऽर्थे दृष्टोपकारालाभेऽप्यदृष्टोपकार कल्पनाया एवौचित्यात् ।

एतदनुरोधेनैव मीमांसका रूढस्य योगरूढस्य वा पदस्य केवलयोगार्थेरूढिपूर्विकां लक्षणामाविष्ठन्ते, योगमात्रेणातदवगमे ह्यतिदेशकत्वं नस्यान्नस्याच्च रूढ्यार्थान्वयानुपपन्नयव्यतिरेकानुविधानम् । बृहस्पतिर्विश्वेदेवैरिति "वाजिभ्योवाजिन" मित्यादावपि निरूढलक्षणयैव योगार्थावगम इतिनप्रयोजनवत्तापेक्ष्यते । निरूढलक्षणयैव तत्प्रयोगस्य साधुत्वोपपत्तेः । निरूढापि सादृश्यहेतुका गौणीवृत्तिः, सैव प्रयोजनमपेक्ष्यत इत्यग्निहोत्रपदमितिकर्तव्यतातिदेशकमित्युपपद्यते । दृश्यते च लोकेऽपिनिरूढलक्षणाप्रयोजनवत्ता ।

तथाहि तवप्रसादात्कुसुमायुधोऽपि सहायमेकं मधुमेवलब्ध्वा कुर्यां "हरस्यापिपिनाकपाणे धैर्यच्युतिंकेममधन्विनोऽन्ये" इत्यत्र कुसुमायुध पिनाकपाणिशब्दाभ्यां ह्युत्तमपुरुषादस्मच्छब्दहरशब्दोपात्तौ, रूढ्योपरिहरकुसुमायुधावभिन्नायुधवति पाणिधृतपिनाकवति च निरूढलक्षणया प्रवर्तमानौ सायुधमपि हरमसायुधोऽप्यहं जयेयमिति विभावनालंकारं व्यञ्जयतः अनयोः पदयोर्योगेन प्रवर्तमानत्वेऽ"प्यनेकमन्यपदार्थ" इत्यनुशासनानुशिष्टयाद्वयोः पदयोरेकस्य पदस्य वाक्यास्यवानिरूढवैलक्षण्येति व्यक्तमुपरिष्टात् ।

अतएव मुखेन्दुमस्याः पश्यामींत्यादाविन्दुपदस्य इन्दुसदृशे निरूढलक्षणया उपमितं व्याघ्रादिभिः सामान्याप्रयोग इत्यनुशासन प्राहितयामुखेऽलङ्कारास्वाद्यानुगुणव्यङ्ग्यमुपस्थाप्यते । प्रतीयमानेन-विना नवैचित्र्यम्, वैचित्र्य श्चालङ्कार इति काव्यप्रकाशकारस्मरणात् । "मुखेन्दुः प्रसन्न" इत्यादाविन्दुपदस्य मयूरव्यंसकादिसमासानुशासन

सिद्धया इन्दुगुणयोगिनिरूढलक्षणया। मुखस्येन्दुताद्रूप्यस्वरूपं रूपकमभिव्यज्यत इतिदिक्।

यत्तु "व्यङ्ग्येनरहिता रूढ" विति काव्यप्रकाशवचनम् तत्र रहिते' त्यनन्तरमपि 'क्वाऽ' प्रक्षेप्तव्यो नत्वेवकारः। अत्रेदं बोध्यम्—एकैवराजपद स्वस्वामिभावसम्बन्धनिबन्धनाराजसम्बन्धिनि लक्षणा। राजपुरुष इति समभिव्याहारज्ञानघटितसामग्रीप्रविष्टा प्रयोजनंविनैव साधुः। "राजा पुरुष" इत्यत्र तु पुरुषस्यालङ्घनीय शासनत्वं व्यञ्जयत्येव। नच तथा 'मुखमिन्दु'-राह्लादयतीतिवत् 'मुखेन्दु' राह्लादयतीत्यादौ, "अग्निहोत्रंजुहोति" सिं "होमाणवकः" यजमानः प्रस्तरः" इत्यादौ धानादिप्रयोगवशान्निरूढापि गौणी लक्षणाप्रयोजनवत्तामपेक्षत इति यथानुभवमूहनीयम्।

'कुन्ताः प्रविशन्ति' इत्यादौ कुण्डधृतपुरुषवत् पुरुषत्वेनैव वा पुरुषाः, 'गङ्गायांघोष' इत्यादौ गङ्गापदादिना तटत्वजात्या गङ्गासम्बन्धितट मुपस्थाप्यते इति। सादृश्य हेतुकालक्षणा तु न कश्चिज्जातिमादाय प्रवर्तते, किन्तुगुणादिनैवेतिनोपादानलक्षणलक्षणयोगौणत्वसम्भवः। यदि 'कुलेयवनोऽय' मितिप्रयोगो यवनसादृश्येन कुलत्व जात्यवच्छेदेन प्रवर्तते अतएव यवनत्वजातिधर्मस्यामेध्यस्यकुलत्वजातादेवध्वननमिहोपपद्यते।

नच व्यक्ताविति प्रामाणिकं, तदाऽप्यनार्यजातित्वादिनाविशिष्टमेवकुलत्वम्। तत्र यवनपदलक्षणा प्रवृत्तिनिमित्तम्। नत्वनवच्छिन्नजातिः। अनवच्छिन्नजात्यवच्छिन्नप्रवृत्तिकत्वन्तु लक्षणलक्षणात्वे प्रयोजकम्, लक्षणाजन्यजात्यवच्छिन्नबुद्धिगुणावच्छिन्नबुद्ध्या व्यञ्जनया विशेषात्पृथक्परिगणनाभिनिवेशो ध्वनिप्रस्थानमीमांसकानाम्।

यदाहुः—धर्मिणिलक्ष्ये धर्माधर्मेलक्ष्ये च तदतिशयः इति धर्मिणि जातिमतिलक्ष्ये धर्माः मुख्यार्थेन ध्वननेन वृत्त्योपस्थित्या अर्थाः प्रतीयन्ते। धर्मेगुणादिमतिलक्ष्ये च गुणाद्यतिशयो गुणादिगता विशेषा इति तदर्थः। तत्राप्येवं सारार्थः। जात्यवच्छिन्नगोचरा लक्षणा, यंकञ्चनार्थं ध्वनयित्वाविश्राम्यतीत्युपादानलक्षणलक्षणामूलकमर्थान्तरसंक्रमितवाच्यकात्यन्ततिरस्कृत वाच्यकध्वनिद्वयमुच्यते। सारोप साध्यवसानलक्षणेतु गौण शुद्धाभेदेन द्विप्रकारिकेऽलङ्कारे चमत्कारमुत्थापयतः।

तथाहि "मुखेन्दोर्मधुरं वच" इत्यादाविन्दुपदस्येन्दु सादृश्यत्वावच्छिन्ने लक्षणा, पूर्वपदार्थ प्रधानको 'मुखमिन्दु' रित्येवमाकारको वाक्यार्थवोधः अतएव तत्र मधुरंवचः सम्बन्धान्वयोनिराबाधः। मुखेचन्द्रसादृश्यमेवोपमालङ्कारः। 'मुखेन्दुराह्लादयती' त्यत्र चेन्दुपदस्य चन्द्रसहचरित प्रसादादिगुणवति लक्षणा। नतु चन्द्रसदृशे आह्लादयतीतिसाधारणधर्मस्य पदोपात्तत्वेनोपमितिसमास सम्भवात्। "उपमितं व्याघ्रादिभिः सामान्याप्रयोग" इत्यनुशासनात्। चन्द्रसहचारित गुणसम्बन्धएव चन्द्रसारूप्यस्वरूपो रुपकालङ्कारः। "इन्दुराह्लादयती" त्यत्रेन्दुपदेन चन्द्रगुणवल्लक्षणेत्यतिशयोक्तिः। "घनश्याम" इत्यादौ घनपदेन घनसदृश लक्षणादुपमैव, उपमानादीनि सामान्यवचनैरितिसमासः।

एवं सादृश्यभिन्ने ताच्छील्यस्वस्वामिभावादिना सम्बन्धेन यत्र शक्यसाधारणगुणाश्रयेण शुद्धालक्षणा, तत्राप्यन्तलक्षणा उत्प्रेक्षैवेति। राजपुरुषे 'राजा शकटार' इति प्रयोगेरूपक मेवालङ्कारः लक्ष्ये शक्यताद्रूप्यप्रतीतेरविशेषात्।

अतएव "नेत्रानन्देन चन्द्रेण माहेन्द्रीदिगलङ्कृते" त्यादौ चन्द्राननसाधारण कमनीयत्वगुणयोगेन प्रवर्तमानायां कार्यकारणभावहेतुकलक्षणायां रूपकमुदाहरन्ति सविद्याविदो नवीनाः।

पाश्चस्तु —हेत्वलङ्कारोऽयं हेतुमतासहहेतोरभिधानमभेदतोहेतुरितिस्मरणात्। हेतुहेतुमद्वाचकयोः पदयोर्लक्ष्यार्थमादाय सामानाधिकरण्यहेतुरिति तदर्था वित्याहुः। तन्मते नेत्रानन्दजनकश्चन्द्र इतिबोधः।

आनन्दपदस्यतज्जनके लक्षणा। "घृतमायु" रित्यत्र आयुः प्राणधारणजनकधर्म, स्तेनसह सहकारित्वलक्षणो घृतस्य सम्बन्धः, आयुर्जन्यजीवितं तज्जनकंघृतमित्यन्वयबोधः। कार्ये जननीये प्रधान कारणसहकारिकारणान्तरमेव समाधिरलङ्कारः। समाधि सुकरंकार्यं कारणान्तरयोगत" इति तल्लक्षणादित्यलङ्कारचमत्कारसमर्था गौण शुद्धसाध्यवसानलक्षणां उपादानलक्षणलक्षणाभ्यां पृथगित्यक्षतात्पर्य पर्य्यालोचनगम्यमर्थं समर्थयन्ते।

"गौणवृत्तेः प्रवृत्तौतु निमित्तंस्यादनेकधा तस्यभेदादलङ्कार ध्वनिभेदाः प्रवर्तते"। 'गौर्वाहीक' इत्यत्र गोपदस्य या सारोपा, साध्यवसाना च गौणी वृत्तिः तस्याः सादृश्यं गोसाधर्म्यजडत्वम् गोसदृशवाहीकत्वं, गोसधर्मवाहीकत्वं, केवलवाहीकत्वञ्चेत्यादीनि प्रवृत्तिनिमित्तानि। एवं "मुखमिन्दुः" "इन्दुःशोभत" इत्यादौ इन्द्वादिपदप्रवृत्तिनिमित्तानि स्वयमूहनीयानि। तत्रेन्दुसादृश्यमात्रेण प्रवर्तमानेन्दुपदगौणवृत्तिर्यथा—

"मुखेन्दौ तवपश्यामिलोललोचनयोर्द्वय" मिति, अत्रहि विद्यमान दर्शनकर्मद्वयान्वययोग्यप्रधानेमुखेइन्दु सादृश्यं तेन वा सह सम-

न्वेति। सादृश्यन्तु भेदेसति साधर्म्यम्। अतएवात्रोपमालङ्कारः। इन्दुसधर्मेणेन्दुपदे गौणी। यथा—आह्लादयतीति "मुखेन्दुर्जगदिदमतुलद्युतिः सुतनो" रित्यत्रेन्दुसधर्मिणीन्दुपदलक्ष्ये तादात्म्येन मुखादेरन्वयः, मयूरव्यंसकादयश्चेतिसूत्रेण जातिवाचिनोः मुखादिशब्दस्य पूर्वनिपातोऽनुशिष्यते। नचात्रेन्दुशब्दस्येन्दुसदृशे लक्षणयोपमितिसमासस्सम्भवति। आह्लादयतीति सामान्यधर्मप्रयोगात्। अतएवात्र नोपमा, किन्तुरुपकमेव। "उपमैव तिरोभूतभेदारूपकमिष्यते" इति दण्डिना सादृश्यघटितभेदांशमोषेण साधर्म्यमात्रस्यरूपकत्वाभिधानात्।

नच पूर्वपदार्थस्यमुखस्यप्राधान्यम्, अतुलद्युतिसमानाधिकरणस्यमुखस्य पदेवाधितत्वात्तद्द्युतेः प्रकाशकरूपविशेषस्य तेजोधर्मत्वात्।

ननु द्युतिपदस्य सुखजनकसाक्षात्कारविषयरूपलाक्षणिकत्वात्, तद्वतासह मुखस्याभेदान्वयोनवाधितः। नहिमुख्यार्थमादायैव योग्यताऽपेक्ष्यते, तथासतीन्दुपदलक्ष्ये मुखाभेदस्यानन्वयप्रसङ्गादिति चेत्, इदमत्राकूतम्। मुखेन्दुरितिसमासस्य द्विविधा तावदाकाङ्क्षाभेदेन मुखपदार्थान्वितेन्दुपदलक्ष्यार्थपरम्परान्वितेन्दुपद मुख्यार्थबोधसामर्थ्यमिन्दुपदमुख्यार्थान्वितेन्दुपद लक्ष्यार्थपरम्परान्वित मुखपदमुख्यार्थेबुद्धियोग्यत्वञ्च। तथाहि इन्दुपदस्य प्रसादादौगुणेऽधिककरणे च खण्डश एवानुशासनग्राहितालक्षणा, विलक्षणाकाङ्क्षावत्त्वेन। तथा प्रसादादौद्विधान्वयः, तेन मुखभेदेनप्रसादे सच सामानाधिकरण्यसंसर्गेणापरत्रप्रसादे, सचाधिकरणे, तदभेदेनेन्दोर्विशेषणमिति मुखप्रसादसजातीयप्रसादवानिन्दुरितिबोधः।

इन्दुर्भेदेन प्रसादे, सच साजात्येनद्वितीयेप्रसादे, सचाधिक-रणे, तदभेदेन मुखे, विशेषणमितिरीत्या पुनरिन्दुप्रसादसजातीयप्रसा-दवन्मुखमितिवाक्यार्थधीः । इयमेव "अगदानन्दकन्दस्यमुखेन्दोर्मधुरं वच" इत्यादौस्वीकरणीया । नहि तत्रेन्दुर्विशेष्यतया भासितुमर्हति, मधुरंवचोऽन्वयायोग्यत्वात्, नापीन्दुरुद्देशेगौणमिन्दुपदम्, अगदा-नन्दजननरूपसाधारणधर्मप्रयोगेनोपमितिसमास सम्भवात्। "आह्ला-दयति मुखेन्दुर्जग" दित्यत्रतु इन्दुपदसमानविभक्तिकातुल्यद्युतिपद-त्वावच्छेदेन द्युतिपदलक्ष्यार्थघटित तन्मुख्यार्थघटितबहुव्रीहिः। अर्थद्वयाभेदेनेन्दुमुख्यार्थावगाहिन्यां बुद्धौसामर्थ्यमेक, मपरञ्चद्युति-पदलक्ष्यार्थमात्रघटितबहुव्रीह्यर्थोभिन्नेन्दुपदलक्ष्यार्थविषयबुद्धिजनन योगत्वमिन्दुरतुलद्युतिनिर्गीर्णाध्यवसानलक्षणारस्थले स्वीकरणीयम् । तयोः प्रथमैवेन्दुपदमुख्यार्थविशेष्यकबोधजननौपयिकी मुखातुलद्यु ति-पदयोराकाङ्क्षा। अतुलद्यु तिपदलक्ष्यार्थमुख्यार्थघटिताकाङ्क्षाद्वय यो-ग्यताद्वय ज्ञानस्वरूपवहुतरसहकारि समवधानवशादधिकरणेन पुन-रिन्दुपदलक्ष्यार्थविशेष्यकबोधौपयिकी द्वितीया, एकैकाकाङ्क्षा योग्यताज्ञानदोवल्यात् । तत्र च सहकारितया मुखेन्दुपदस्येन्दुपदार्थ-विशेष्यकबोधजनकसामग्र्यनुप्रविष्टे चाकाङ्क्षासहकारितासमापद्यते । तेन मुखप्रसादसजातीय प्रसादवानिन्दुः, अतिशयित सुखजनक साक्षा-त्कारविषयरूपवानतुलप्रभाववांश्चेतिबोधः । नत्विन्दुप्रसाद सजातीयप्र-सादवन्मुख मतिशयितलावण्यंवादितिधीः, रसवत्यामतुलद्यु तिपद मुख्यलक्ष्यार्थघटिताकाङ्क्षायोग्यताज्ञानद्वयघटितायामेव सामग्र्यां मुखेन्दुपदाकाङ्क्षाज्ञानस्य घटकतया मुखविशेष्यकबोधाजनकत्वान्मुखे-ह्यतुलद्युतिपदघटित मुख्यार्थ योग्यताज्ञानं नविद्यते। एवमेव-"यस्यां निवेशयत्रिपथश्चरणारविन्द मुत्तंसयन्त्यमितभक्तितरावनम्रा" इत्यत्र

उत्तंसयते सा दयाकर्णनेलाचणिकत्वेऽपि तन्मुख्यार्थलक्ष्यार्थोभयान्वयायोग्य रविन्दु प्रधानक एव वाक्यार्थबोध इतिरुपक मेव ।

"पदाम्बुजं भवतु वोविजयाय मञ्जु मञ्जीरसिञ्चित मनारतमम्बिकाय।" इत्यत्र मञ्जीरान्वययोग्यचरणप्रधानकमम्बुजमिव पाद इतिबोधादुपमालङ्कारमीमांसाप्युपपद्यते इति। "मुखेन्दुरतुलद्युति "रित्यत्र मुखपदार्थस्य नातुलद्युतिपदार्थम्प्रति विशेष्यता, किन्त्विन्दु पदार्थस्यैवेति। यदितु "मुखेन्दुना जितोऽतुलद्युति" रित्यादावाकाङ्क्षाद्वयसत्त्वान्मुखेन्दुरतुलद्युति रितिबोधाप त्तवारणाय प्रथमान्त मुखेन्दु पदत्वावच्छेदेन प्रथमान्तातुलद्युतिपदलक्ष्यार्थान्वितस्वार्थबुद्धिसमर्थत्वस्वरूपाकाङ्क्षाज्ञानंमुखपदमुख्यार्थेइन्द्वादिपदलक्ष्यार्थोपस्थितिघटिता भिन्नैवसामग्रीवाच्या। सम्भवति चातुलद्युतिपदव्यतिरेकप्रयोज्यव्यतिरेकप्रतियोगितावच्छेदकविषयतानिरूपित तादात्म्यसंसर्गता निरूपिताया मुखेन्दुपद व्यतिरेकप्रतियोगितावच्छेदिकाविषयता तदवच्छिन्नप्रतियोगिताकाऽभावप्रयोजनव्यतिरेकप्रतियोगिक मुखेन्दुरतुलद्युतिरिति वाक्यमित्याकारः। शक्यलक्ष्यार्थ भेदेनाभिन्नएवाकाङ्क्षाग्रह स्तत्तत्पदार्थोपस्थितियोग्यताज्ञानादि सहकारेण शक्य लक्ष्यार्थबुद्धिसहस्रजनक इति मुखपदार्थ प्राधान्येऽपि नकिञ्चिदिहापहीयत इति विभाव्यते। तथापि मुखेन्दुरतुलद्युतिरितिवाक्येन मुखाभिन्न इन्दुसधर्मातिशयितलावण्यवानिन्दुसधर्माभिन्नं मुखम्वा, तथाविधमितिबोधकालएवेन्दुः प्रवृष्टभास्कररूपवानित्याकारकोऽप्यन्वयबोधः स्वीक्रियते। इन्दुपदेन मुख्ययावृत्त्योपस्थिते मुख तुलद्युतिपदार्थान्वयबाधकाभावादिदमेवेन्द्वादिपदार्थस्य प्राधान्यं यत्पदान्तर मुख्यार्थान्वयसहिष्णुत्व मिति।

वस्तुतस्तु मुखेन्दुरतुलद्युतिरित्यत्र इन्दुसधर्मिणि प्रसन्ने वेन्दुशब्दस्य लक्षणा। तदर्थम् प्रतिमुखस्य विशेष्यत्वमेव। तस्मिन्निन्दुसधर्मिणि मुखेऽतिशयितलावण्यवानतुलद्युतिपदलक्ष्यार्थस्तादात्म्येनान्वेति। मुखाभिन्नस्येन्दु सधर्मणोरभेदः पुनरिन्दु मुख्यपदार्थो पृथगविशेषणीभूयभासते। तेनेन्दुसधर्मिणा मुखेनेन्दोरभेदोऽस्तु, इन्दु सधर्मत्वावच्छिन्न प्रतियोगिताक भेदाभावस्वरूप एव संसर्गतया भासते। दृश्यतेच जात्युभेदोपमा सामानाधिकरण्यम्, तदेवेदमौषधम। "सैवेयं गुर्जरी" "ता एव चैत्रक्षपाः" इत्यादौ।

नच 'मुखेन्दुरित्यादौ मुख्ययोरेव मुखेन्दुपदार्थयोरिन्दु सधर्मित्वाद्यवच्छिन्नाभेदसंसर्गेणान्वये सम्भवतीति किमिन्द्वादिपदस्येन्दु सधर्मादौलक्षणयेति वाच्यम्, भेदप्रतियोगितावच्छेदकधर्मोपस्थितिंविना अनुगतधर्मावच्छिन्नभेदाभावस्य संसर्गतयापि भानासम्भवेन तदुपस्थापनाय गुणवृत्तेरावश्यकत्वात्। मुखान्योऽन्याभाववानिन्दुरित्ययोग्यताग्रहस्यतु मुखत्वावच्छिन्नप्रकारतानिरूपितस्वानवच्छिन्नावच्छेदकतासांसर्गिकविषयत्वस्य निरूपिकाया तन्निरूपकतात्वावच्छिन्नासांसर्गिकविषयता तन्निरूपकभेदत्वावच्छिन्नप्रतियोगिताकत्वसांसर्गिक (स्वरूपाभेदोपहित तद्व्यक्ति स्वरूपविशेषितभेदसमान्याभावः सचाननुगतोऽपि) विषयतया निरूपितया अभावत्वावच्छिन्न सांसर्गिकविषयता तन्निरूपितेन्दुत्वावच्छिन्नविशेष्यताकबुद्धित्वमेव प्रतिबध्यतावच्छेदकम् स्वरूपाभेदसांसर्गिकास्वेव बुद्धिषु वर्तते, न जात्यभेद सांसर्गिकास्वरूपाभेदोहि तत्तद्व्यक्तिस्वरूप विशेषिताभेदसामान्याभावः। सचाननुगतोऽपि स्ववृत्तिनिरवच्छिन्नावच्छेदकतानिरूपकभेदत्वावच्छिन्न प्रतियोगिताकाभावस्वरूप (भेदाभाव प्रतियोगि-

तावच्छेदकत्वं भवतुवा स्ववृत्त्युभयावृत्तिधर्मावच्छिन्नावच्छेदकता-निरूपक भेदत्वावच्छिन्नप्रतियोगिताकाभाव एव स्वरूप) परम्परया संसर्गत्वेनानुगमनीयः। तदीयसांसर्गिक विषयतानुगमप्रकारोपदर्शित एवं सम्भवति।

नचानवच्छिन्नस्यस्वरुपस्य स्वरुपाभेदाभावप्रतियोगितावच्छेदकत्वम्। भवतुवा स्ववृत्त्युभयावृत्तिधर्मावच्छिन्नावच्छेदकतानिरूपकभेदत्वावच्छिन्न प्रतियोगिताकाभाव एव स्वरुपाभेदः। जात्यभेद सांसर्गिकबुद्धौतु जात्यवच्छिन्नभेदवत्ताबुद्धिरेव विरोधिनी। तेनं सैवेयंगुर्जरी "त्यादौ तरोदन्ताविशिष्ट गुर्जरीत्वावच्छिन्न प्रतियोगिताकभेदग्रहे सति नाभिमतोबोधः। अतएवेन्दुत्व मुखत्वावच्छेदेन प्रसन्नत्वादि धर्मवत्ताग्राहिका गौणीवृत्तिरतउपयुज्यते।

एवमुपस्थितेन्दु सधमत्वादिना मुखाभिन्ने इन्दौ प्रकृष्टप्रभावानतुलद्युतिपदार्थः स्वरूपाभेदेनान्वेतीति।

एवञ्च मयूरव्यंसकादि समासमूलक गुणवृत्तौ उत्तरपदलक्षार्थ विशेषणक पूर्वपदार्थः। तथाविधपूर्वपदार्थ विशेषितः, तथोत्तरपदार्थ उत्सर्गतो भासते।

"प्रसन्नेन दृगब्जेन दृश्यतेमदिरेक्षणे" त्यादौ प्रसादरुपसाधारण धर्मसम्बन्धःपुनरब्जे दृशिचावगन्तुमिष्यते, परन्तु वीक्षणकरणत्वान्वयानुरोधेन विपूर्वपदार्थस्यैव प्राधान्यमभ्युपेयते। तेन प्रसन्नाब्जनिरूपितजात्यभेदवती अब्जसधर्मप्रसन्ना दृग्वीक्षणकरणत्वान्वयार्थबोधः।

एवं जातेन "वाहीकेनदण्डमादाय गुप्ता धनिकस्य गाव" इत्यत्र जड़गवांसधर्मिणा जडेनवाहीकेन गावोगुप्ता इत्यन्वयबोधः।

यदितु गौर्वाहीक इत्यादौ गोपदस्य जडत्वावच्छिन्ने न्दुपदस्याह्लादक-त्वादिगुणविशिष्टे लक्षणा तदा गोधर्मास्तत्रव्यञ्जनया वृत्त्यैव भासन्ते इति व्यङ्ग्यमिहरूपकं नतु वाक्यार्थः। अतएवाग्निहोत्रपदस्याग्नि-होत्रपद मुख्यार्थपरिहारेण केवलयोमार्थपुरस्कारेण कौण्डपायिना मथनत्वावच्छेदेनवा गृहीतागौणीलक्षणा, तत्रत्मुख्यार्थधर्मानतिदि-शति, नतुसाधारणगुणाश्रय गौणीवृत्तिलिङ्गमवगम्यते। क्वचित्तु शब्दलभ्येऽर्थे निराकाङ्क्षत्वं लक्षणावीजम्।

यथा—"त्वामस्मिवच्मि,हे चैत्र स्थितिमत्रविधेहि वदि" त्यत्र चैत्रपदसमभिव्याहृता सम्बन्धिप्रथमास्थितिं विधेहि त्वमितिवाक्यार्थ विषयकज्ञानसमवायित्वेनोद्देश्यत्वं चैत्रस्यावगमयतीति सिद्धार्थक-तया त्वांवच्मीतिवाक्यं न मुख्यार्थं बोधयति। वचिधातोर्हि शाब्द-वोधानुकूलं वचनमर्थः। त्वच्छब्द समभिव्याहृता द्वितीयातु सम-वेतत्वेनेष्यमाणत्वमभिधत्ते, नतु समवेतत्वमात्रम्। "राजानंहितमवो-चमचायमश्रौषी"-दित्यादि प्रयोगदर्शनात्।

तथाचात्र शब्दसिद्धार्थकतया प्रतिबद्धे स्वार्थे वचिरुपदेशतया परिणतं स्वार्थं लक्षयति। क्वचिदविनाभावबोधसामग्रीविरहात्, शाब्दबोध प्रतिरोधो लक्षणाबीजम्। यथा—'गङ्गायां घोषमत्स्यौ" इत्यत्र प्रथममभिधया स्माारितेषु घोषमत्स्याधिकरणता प्रवाहेषु सत्य-पि योग्यत्वेम गङ्गाधिकरणकोमत्स्य इत्यन्वयबोधः, अयोग्यतया गङ्गापदार्थान्वितघोषबुद्धिसामग्रीवैधर्म्याद्गङ्गायां घोषमत्स्याविति द्वन्द्व स्थलेद्वयीसामग्री एका गंगायां मत्स्यइति वाक्यार्थबुद्धिप्रयोजिका, तस्यां गङ्गायामिति पदोत्तरं निर्विभक्तिक घोषपदाव्यवहितोत्तर द्विव-चनान्त मत्स्यपदमिति समभिव्याहार ज्ञानं। गङ्गासप्तमी मत्स्यपदै-

र्जनिवा प्रवाहाधिकरणता मीनानामुपस्थितिश्चेत्यादीनिकारणानि निविशन्ते, द्वितीया गंगापदार्थान्वितघोषबुद्धिप्रयोजिका तस्यां द्विवचनान्त मत्स्यपदाव्यवहितपूर्वनिर्विभक्तिक घोषपदत्वावच्छेदेन गङ्गायामिति पदसमभिव्याहृतत्वस्य ज्ञानम् । अयोग्यता ज्ञान विरहः, पदार्थानामुपस्थितिश्चेत्यादीनि कारणानि प्रविशन्ति ।

नन्वेवं घोषस्य मत्स्याविति विग्रहोत्थसमासे गङ्गायांघोष इतिबुद्धिरुपपद्येतेतिचेन्न । मत्स्यपदार्थ विषयत्वानिरूपितस्वार्थविषयताकशाब्दजनक द्विवचनान्तमत्स्यपदाव्यवहित पूर्ववर्त्ति घोषपदं गङ्गायांमितिपदे, न समभिव्याहृतमितिज्ञानस्यैव तथाविधसामग्र्यामनुप्रवेशात् । अनयोश्च सामग्र्योरेकतर विरहेऽन्यतरा न फलं जनयतीति गंगायांघोषमत्स्याविातिवाक्यंगङ्गापदजन्य तटोपस्थितेः पूर्वं गंगापूरे मत्स्यान्वयबुद्धिमपिनजनयितुमीष्टे । मिलितयोस्तयोः सामग्र्योरुभयसमूहालम्बन शाब्दबोधं प्रत्येव प्रयोजकत्वात् ।

एवं "प्रासादं प्रतिमध्याह्ने पुष्पवन्तौ विलोकये" इत्यत्र पुष्पवत्पदेन चन्द्रसूर्ययोरुपस्थितौ सत्यामपि सूर्यं विलोकयेति नान्वयबोधः । द्वितीयपदार्थस्य चन्द्रस्य मध्याह्ने बाधात् पुष्पवन्तौ विलोकयेत्यादि समभिव्याहारघटितायाः सामग्र्या सूर्यकर्मकमिन्दुकर्मकञ्च दर्शनमिति समूहालम्बनबुद्धिम्प्रत्येव प्रयोजकत्वादिति पुष्पवत्पदार्थयोरेकतरेण चन्द्रेण कामिनी कामिनीमुखं लक्षयित्वा प्रासादोपलक्षितमध्याह्ने कामिनीवदन मर्कञ्च पश्येत्यनुभाव्यते ।

कश्चित्तु लक्ष्यार्थ तात्पर्य ग्रहेण मुख्यार्थबोधप्रतिबोधो लक्षणाबीजम् । यथा—व्रीहीनवहन्तीत्यत्र यवबोध तत्परमवहन्ति समभिव्याहृतं व्रीहिपदमितिग्रहे सतिप्रतिबद्धे व्रीहित्वावच्छेदेनावहननकर्म

त्वान्वये व्रीहिपदस्मृतेनव्रीहिणा नियोगसाधनमपि पुरोडाशोपादानभूतावयव द्रव्यमुपलक्ष्यते। तथाच काकेभ्योदधिरक्ष्यतामित्यत्र स्वबुद्धिपरमिदं वचनमिति तात्पर्यग्रहान्मुख्यार्थेन दध्युपघातकप्राणिनो लक्ष्यन्ते यवे सारमेये च लक्ष्यतावच्छेदकरूपेण यवत्वस्वत्वादिना वा तात्पर्यग्रहो लक्षणामूलमित्यन्यदेतत्। अवहन्तिपदसमभिव्याहृतद्वितीयान्तव्रीहिपदं नियोगसाधनद्रव्यविशेष तात्पर्यकमितिनिर्णयस्य तथाविधिनिर्णयवदन्यजन्यबुद्धित्वमेव प्रतिबध्यतावच्छेदकम् तद्वृत्तिता तु स्वसामानाधिकरण्यस्वाव्यवहितोत्तरत्व संसर्गाख्यमिति, तथाविधनिर्णयाभावघटितेव निरुक्तसमभिव्याहारज्ञानघटिता व्रीहित्वावच्छेदेनावहननकर्मत्वमवगमयितु मीष्टे। निरुक्तव्रीहिपदं व्रीहित्वविशिष्टबोधपरमितिनिर्णयस्यापि स्वाव्यवहितोत्तरत्वोत्पत्तिक स्वसमानाधिकरणबुद्धावेव जनकत्वमुपेयते, तथाविध व्रीहितात्पर्यनिर्णयघटिता यवतात्पर्यनिर्णयाभावाघटिता पृथगेव व्रीह्यनुभवसामग्री, यद्बलाद्व्रीहित्वविशिष्टतात्पर्यकं यवादितात्पर्यकञ्च निरुक्तव्रीहिपदमितिग्रहसत्त्वे व्रीहेरप्यन्वयबुद्धि रुत्पद्यते। तत्र यवस्मरणमनपेक्ष्य व्रीहि मात्रस्यान्वयबोधवारणाय यवतात्पर्यग्रहाभावाघटितायां व्रीह्यनुभवसामग्र्यां व्रीहितात्पर्यरीत्या क्लृप्तकार्यकारणभावो यवतात्पर्यग्रहो नियोगसाधनद्रव्यत्वेन यवस्यव्रीहिपदाधीनं स्मरणञ्च प्रवेशनीयम्। अतो यत्र यवव्रीहितात्पर्यावगाहि व्रीह्यादिपदार्थस्मरणं तत्र नाहत्यव्रीह्यावघातकर्मत्वान्वयः।

किन्तु व्रीहिणा नियोगसाधनद्रव्यस्मरणानन्तरमेव व्रीहिं नियोगसाधनद्रव्यञ्चावहन्तीति बोध उत्पद्यते। यत्र च दैवाद्यवतात्पर्यग्रहाभावे व्रीहितात्पर्यावगाहि मुख्यपदार्थानां स्मरण तत्र प्राग्विद्यमानोऽपि मुख्यार्थतात्पर्यग्रहः सामग्रीमध्ये प्रवेश्यते, प्रयोजनविरहा-

त्कार्यस्य लक्ष्यतात्पर्यग्रहाभावविशिष्ट मुख्यार्थ स्मृत्यादिसामान्य सामग्र्यैव तदुपपादनादिति प्रणिधेयम् ।

तदर्थ तात्पर्यकत्वन्तु तदर्थप्रतिपत्ति साधनताज्ञानाधीन प्रयत्नसाध्यन्तु तदर्थ प्रतिपत्त्युद्देश्यक प्रयत्नसाध्यत्वम्वा, तदर्थप्रतिपत्तित्वावच्छिन्नाभावप्रयोजकीभूताभाव प्रतियोगिज्ञानविषयत्वम्वा इत्यन्यदेतत् । यत्र गङ्गापदस्मरणमेव प्रथमम्, अथ पूरस्मरणं सप्तमीगुणपदविषयकं ततस्तटस्य प्रवाहस्याधिकरणताया गुणस्यचैकं स्मरणम्, आकाङ्क्षाद्यवगाहि ततस्तटे गुण इत्यपि प्रसज्येतान्वयबोधः । मुख्यार्थबाधादेः शाब्दसामग्रीविघटकस्य तत्रानपेक्षणीयत्वात् तटस्मरणस्य सम्पन्नत्वादितिचेन्न । गङ्गाप्रवाहेगुणइतिशाब्दबोधस्य स्वविशिष्टान्य जन्यबुद्धौ कार्यसहभावेन प्रतिबन्धकतया तदभावस्य पूर्वक्षणावच्छेदेन कार्योत्पत्तिक्षणावच्छेदेन च तदात्मनि प्रत्यासन्नस्यापेक्षितत्वाद गंगाप्रवाहे गुण इति शाब्दोत्पत्ति समये तटेगुण इति बुद्धेरनुत्पाद सम्भवाद्गुणपदसमभिव्याहृत गंगापद तटतात्पर्यकमितिनिश्चयस्यापि स्वविशिष्टबुद्धौ कारणतया तद्घटिताभिन्नैव सामग्री वा तटे पूरे च तात्पर्यग्रहात् तटे पूरे च गुण इत्यन्वयबोधः । एतेन गंगायोगुण इति वाक्यार्थबोधो यत्र दैवात्पदविषयकस्ततस्तटाधिकरणतादीनां पदार्थानामुपस्थिति राकाङ्क्षादिविषयिणी तत्रतटे गुणइति शाब्दबोधापत्तिरपिप्रत्युक्ता, गंगाप्रवाहे गुणे इति शाब्दबोधाभावघटित सामग्र्यभावात्तटादिपदार्थोपस्थितेस्तटतात्पर्याविगाहित्वेतु तट तात्पर्यग्रहघटिता वा सामग्र्या जायतएव तटान्वयबोधः ।

एवञ्च मुख्यार्थबाधादेः मुख्यार्थान्वयबुद्धिप्रतिबन्धद्वारा लक्ष्यार्थान्वयबुद्धावुपयोगित्वमवसेयम् ।

अत्रेदं विवेचनीयम्—गंगायां गुण इति शाब्दबोधस्य स्वध्वं-साधिकरणसमयध्वंसानधिकरणसमयवृत्तित्व, स्वप्रागभाव निरूपित-कालिकाधिकरणकभिन्नत्वोभयसंसर्गेण तथाविधशाब्दवदन्यत्वविशिष्ट जन्यबुद्धित्वं प्रतिबध्यतावच्छेदकं ध्वंसवृत्त्युभयावृत्तिधर्मावच्छिन्नाव-च्छेदकतानिरूपिताधिकरणसमयत्वावच्छिन्नावच्छेदकतानिरूपित-ध्वंसत्वावच्छिन्नावच्छेदकतानिरूपिताधिकरणसमयत्वावच्छिन्नप्रति-योगिताकान्योऽन्याभाववत्स्वसमयवृत्तित्वम् प्रागभाववृत्तिर्या उभया-वृत्तिधर्मावच्छिन्नाकालिकसंसर्गावच्छिन्नाचावच्छेदकता तन्निरूपिताधि-करणतानिष्ठावच्छेदकताकानिरूपितप्रतियोगिताकान्योऽन्याभाववत्त्व-श्चेत्युभयसंसर्गावच्छिन्ना वा शाब्दबुद्धित्वावच्छिन्नावच्छेदकता तन्नि-रूपितप्रतियोगिताकान्योऽन्याभावेनविशिष्टे जन्यबुद्धित्वे कथितशाब्द-बोधाभावजन्याप्रवर्तते इति न युक्तम्, "वंशे मुक्तामणिर्वद्ध" इत्यादौ लक्ष्यलक्ष्यक साधारणगुणस्य प्रागग्रहणेन तदवच्छेदेन मणिपदादि-लक्षणाया ग्रहीतुमशक्यत्वादितिचेन्न। वंशपदार्थसंसृष्टत्वादेरेव तथा-विधस्यगुणस्य सौलभ्यात्।

तथा च मुक्तामणिपदलक्षणार्थे वंशपदार्थे संसृष्टे वंशपदो-पात्तकुलसम्बन्धः तून्मुख्यार्थे मणौवंशपदोपात्ते वेणुसम्बन्धो यौग-पद्येनान्वेति। तथाच कुलसम्बन्धिवंशपदार्थसंसृष्टस्वरूपाभिन्नो-बोधो वेणुसम्बन्धिमुक्तामणिजातयभिन्न इति बोधः। जातयभेदस्य तत्र वंशपदबोध्यसम्बन्धत्वावच्छिन्नप्रतियोगिताक भेदाभावस्वरूपो-भासते।

एवं "मुखमिन्दु" रित्यादि वाक्येऽपि इन्दुपदस्य प्रसन्ने लक्षणा, प्रसन्नाभिन्ने मुखेचेन्दुपदमुख्यार्थस्य प्रसन्नत्वावच्छिन्नभेदाभावस्वरूपजात्यभेदसंसर्गेणान्वय इत्यादि स्वयंमूहनीयम्। "शूरोऽयं क्षत्रियवंशो गांगोपायती" त्यादौ गोपदेन गोसदृशवाहीकत्वेन गोसधर्मवाहीकत्वेन जड़वाहीकत्वेन, शुद्धवाहीकत्वेनवागोपद वाहीकत्वेन वा गोपद्वाहीक मवगमयति, वाहीक बोधकपदान्तराभावोनवाहीकत्वविशेषितधर्मावच्छिन्न एव, गोपदस्य साध्यवसानलक्षणास्वीकारात्।

अतएव "कचतोत्रदनं तस्याः वदनात्कुचमण्डलम्, विभेतिमध्यानयनं नयनादधोवासः समुद्विजति", इत्यत्र कचवदनपदादिनाराहुचन्द्रकश्च सादृश्यमाहुः। तन्मुखसदृशतत्त्वादिनैववोधोजन्यते, अतएव कचपदार्थस्योपादानत्वं वदनपदार्थस्य त्रासंप्रति कर्तृत्वञ्च साधु सम्प्रतिपद्यते।

केचित्तु–साध्यवसानलक्षणयापिमुख्यार्थसधर्मत्वादिनैव लक्ष्यार्थः प्रतीयते, नतु लक्ष्यव्यावर्त्यधर्मेण। यथा–"सुधावद्धग्रासैरुपवनचकोरैरनुसृताम्, किरञ्ज्योत्स्नामच्छांलवलिफलपाकप्रणयिनीम्। उपप्राकाराग्रे प्रहिणुनयने तर्कयमना, गमाकाशे कोऽयं गलितहरिणः शीतकिरणः" अत्रशीतकिरणपदेन चन्द्रसधर्मत्वादिना मुखं प्रत्याय्यते, नतु मुखत्वेन कोऽयमितिप्रसिद्ध सब्रह्मचारिव्यतिरेकबोधकेन सर्वनामसमुदायेन गलितहरिण इति सजातीय व्यतिरेकोपपादकविशेषणेन च चन्द्रमुखोभयानुगामि धर्मवदबोधकमिन्दु पद मित्यध्य-

वसायात्। नहि किमिदं मुखगलित हरिण ? इतिवा वाक्यादावपि तथाविधोऽर्थः प्रतीतिपथमवतीर्यंचमत्करोति।

इति पूर्णो न्यायाविरोधी भक्तिविवेकः ॥

रसिकैः काव्यमीमांसा प्रस्थानेयद्विविच्यते ॥

निर्मितस्तत्प्रपञ्चाय मया रसमहार्णवः ॥

इति महामहोपाध्याय गोकुलनाथोपाध्यायविरचितो

रसमहार्णवः सम्पूर्णः ॥

कामेश्वरसिंहदरभंगासंस्कृतविश्वविद्यालय, कामेश्वरनगर

दरभंगा से प्रकाशित ग्रन्थों की तालिका

क्रमांक	ग्रन्थनाम	अनुवादक लेखक/सम्पादक	मूल्य
		(क)	
१	विद्यापति संस्कृत ग्रन्थावली (प्रथम भाग) (प्र०ख०सटीक-विभागसार एवं शैवसर्वस्वसार)	स० डॉ० जयमन्त मिश्र डॉ० इन्द्रकान्त झा	७५/-
२.	मीमांसाश्लोकवार्त्तिक (सटीक)	ले० कुमारिल भट्ट अनु-विद्यावा० दुर्गाधर झा	१५०/- विदेश २५ डालर
३	ध्वनिकल्लोलिनी (सटीक)	ले पं० श्री आनन्द झा	२५/-
४	शशिनाथ निबन्धावली (खण्डनकारिका)	स०-विद्यावाचस्पति प. श्री रामचन्द्रमिश्र	३०/-
५	रघुवंशमहाकाव्यम्— (सम्पूर्ण मूलमात्र	,,	४/-
६.	हरविज-यप्रथमसर्ग सटीक	,,	१/-
७.	मेघदूतम् (मूलमात्रम्)	,,	५० पैसा
	मुघदूतम ,,	,,	५० पैसा
८.	न्यायरत्नाकर	म० म० उमेश मिश्र	७/-
९	कालिदासीयोपरुपकाणां समुच्चयः	,,	५/-
१०	कालिदास साहित्यम्	ले० डॉ० अद्याप्रसाद मिश्र	२/-
११	समासशक्तिदीपिका—	ले० महावैया० पं० दीनबन्धु झा	५/-
१२.	वाजसनेयिनां विवाहादिसंस्कार पद्धतिः	स० पं० श्री तेजनाथ झा	२/७५ पै०
१३	स्मृतिसाहत्री (मैथिली)	ले. प. श्री बुद्धिधारी सिंह 'रमाकर'	१५/-
१४.	मिथिला का इतिहास	ले. रामप्रकाश शर्मा	७५/-
१५	मिथिलामाहात्म्यम् (सटीक)	स० अ० पं० श्री धर्मनाथ झा	५/-
१६.	अभिनन्दनमाला	स० रामचन्द्र मिश्र	५/-